जुहोतेर्दीर्घः जुहूः पदान्तस्यानितेर्नस्य णत्वमुपसर्गस्थान्निमित्तात् अन प्राणने हे प्राण् मित्राणि शास्तीति मित्रशीः आशासः क्वावुपधा
याइत्वम् आशीः गीः पूः द्युसन्नन्त्रक्विपुच्छादेर्ह्रस्वः छद अपवारणे चुरादिः तनुं च्छादयतीति तनुच्छत् अक्षद्यूः राच्छ्वोर्लोपः मूः मुरौ धूः धु
रौ दुहः कोघोऽन्तादेशश्च कामदुघा दृशेष्टक्सकौ चोपमाने कर्म्मण्युपपदे दृशेष्टक्सकौ स्तः क्विप् आः सर्वादेः एषु परेषु सर्वादे
रात्वम् अन्यादृशः अन्यादृक्षः अन्यादृक् तादृशः तादृक्षः तादृक्॥

ह्रस्वः स्यात् एषु परेषु द्युसि प्रत्यये छदिः मन् प्रत्यये छद्म त्र प्रत्यये छत्रम् क्विपि तु तनुं छादयती
ति णेरिति णिलोपः तनुच्छत् दिवु क्रीडादौ अक्षैर्दीव्यतीति च्छ्वोः शूडनुनासिके चेति वस्य ऊठ् अक्षद्यूः मुर्छा मोहसमुच्छ्राययोः मूर्छतीति रेफात् च्छ्वोरिति छलोपः र्वोर्विह
सेदिति दीर्घः मूः धुर्वी हिंसायाम् धूर्वतीति रेफात् च्छ्वोरिति वलोपः धूः दुहः कोघ्यान्तादेशश्च दुहः कप्रत्ययो हस्य घश्च स्यात् कप्रत्ययमाह कित्वाद्गुणो न कामं दोग्धी रामः
ति कामदुघा धेनुः दृशेष्टक्सकौ चोपमाने कार्ये टक् सकौ प्रत्ययौ वा ह टित्वाद्गुणो न आः सर्वादेः सर्वादेष्टे रात्स्यात् दृक् दृश दृक्षेषु परेषु अन्यमिव पश्यतीति अन्या ७
दृशः ई पि अन्यादृशी क्षशे षेति षत्वं षढोरिति कः अन्यादृक्षः क्विपि अन्यादृक् तमिव पश्यतीति तादृशः ई पि तादृशी तादृक्षः तादृक् ॥

किमिदमः कीश् किमूशब्दस्येदमशब्दस्य च की ई इत्यादेशौ स्तः कमिव पश्यतीति कीदृशः ईपि कीदृशी कीदृक्षः कीदृक् इदमिव पश्यतीति ईदृशः ईपि ईदृशी ईदृक्षः
ईदृक् भवंतमिव पश्यतीति भवादृशः ईपि भवादृशी भवादृक्षः भवादृक् यमिव पश्यतीति यादृशः ईपि यादृशी यादृक्षः यादृक् अमुमिव पश्यतीति अदसष्टेरात्वे
कृते दसस्य ऊ इति मः मादूङ् त्यूत्वं अमूदृशः ईपि अमूदृशी अमूदृक्षः अमूदृक् मामिव त्वामिव च पश्यतीति त्वन्मदेकत्वे इति त्वन्मदौ टेरात्वे च मादृशः ईपि मादृशी मा
दृक्षः मादृक् त्वादृशः ईपि त्वादृशी त्वादृक्षः त्वादृक् अस्मानिव युष्मानिव च पश्यतीति अस्मादृशः ईपि अस्मादृशी अस्मादृशः [illegible]स्मादृक् युष्मादृशः ईपि युष्मादृशी
युष्मादृक्षः युष्मादृक् णिनिरतीते नाम्न्युपसर्गे चोपपदे धातोरतीते काले ता[illegible]च्छील्ये णिनिः स्यात् कर्त्तरि णिनिप्रत्ययमाह णित्वाद्वृद्धिः इकार उच्चारणार्थः यज देवपूजा

किमिदमः कीश् कीदृशः कीदृक्षः कीदृक् ईदृक्षः ईदृशः ईदृक् भवादृशः भवादृक्षः भवादृक् यादृक् अदसोऽमूः त्यादृक् दृशादक्षेषु अमूदृ
क्षः अमूदृशः अमूदृक् मादृशः मादृक्षः मादृक् त्वादृशः त्वादृक्षः त्वादृक् युष्मादृशः युष्मादृक्षः युष्मादृक् अस्मादृशः समानस्य सः सदृशः सदृ
क्षः सदृक् णिनिरतीते धातोरतीते काले [illegible] शीले च णिनिः अग्निष्टोमेनायाक्षीत् अग्निष्टोमयाजी पितृव्यघाती उष्णभोजी व्रते च स्थण्डि
लशायी क्विप्वनिपूडाः धातोरतीते शीले चैते ब्रह्महा भ्रूणहा वृत्रहा सुकृत् धर्मकृत् पापकृत् अग्निचित् ॥ यो अग्निष्टोमेनेष्टवान् इति इङ्नामिति

दीर्घो अग्निष्टोमयाजी ज्योतिष्टोमसमाप्यमानो यो यागः सोऽग्निष्टोमः पितृव्यं हतवानिति हनो घत्व इति घत्वं पितृव्यघाती शीले तु उष्णं भोक्तुं शीलमस्येति उष्णभोजी शीले किम् उष्णं भुं
क्ते ब्राह्मणः व्रते व्रतेऽर्थे णिनिः स्यात् स्थण्डिले शेते व्रतार्थमिति स्थण्डिलशायी बहुलमाभीक्ष्ण्ये णिनिः आभीक्ष्ण्यं पौनःपुन्यं क्षीरपायिण उशीनराः एतत्सर्वमनुक्तसमुच्चयार्थं
च शब्दानुवृत्ते लभ्यते क्विप्वनिपूडाः पुनः क्विप्वनिपूड प्रत्यया नाह क्वित्वाद्गुणो न पित्वात्तुक् ङित्वाट्टिलोपः इकार उच्चारणार्थो वेरिति विलोपः ब्रह्मभ्रूणवृत्रेषु कर्मसूपपदेषु हं
तेः क्विप् नान्यत्र ब्रह्माणं हतवानिति इन्नामिति दीर्घः ब्रह्महा भ्रूणं गर्भं हतवानिति भ्रूणहा वृत्रं दैत्यं हतवानिति वृत्रहा इन्द्रः कर्म कृतवानिति कर्मकृत् पापं कृतवानिति पापकृ

सि॰ चं॰ पुत्रूमिन्द्रेसोमंसुतवानितिसोमसुतूवनिपितुयजदेवपूजादौ ईश्वानितिनोपधायाइतिदीर्घः यञ्चाइप्रत्ययेतुजनीप्रादुर्भावेसरसिजातमितिसरसिजंसरोजंसप्तम्याऋ
कृ॰ उ॰ लुकूवासंस्काराज्जातइतिसंस्कारजः प्रकर्षेणजातेतिप्रजाआवनइत्यापूप्रजास्यानुसंततोजनेइत्यमरः नजातइतिअजः नाइत्यदादेशःइ ... जन्मसंस्काराभ्यांजातइ
८ तिद्विजः खनुखननेपरितःखनतितिआवतइत्यापूपरिखाक्तक्तवतूप्रत्ययावाहकित्वाइगुणोनउकारान्तोनुमितिनुमर्थः क्तप्रत्ययोभावकर्मकर्तृषुभवति ... कृते
र्यवलापोचैवत्वयाऽस्त्रायिइतिस्त्रातंअकारीतिकृतः कटस्त्वयाअकार्षीदितिकृतवानूअत्वसोंसाविति दीर्घः गत्यर्थादकर्मकात्कर्तरिक्तः गत्यर्थादकर्मकाच्चधातोःक्तः।
स्यात्भावकर्मकर्तृषुअगमदितिगतोगंगांसःलोपस्त्वनुदात्तेतनामितिमलोपः अस्यादितिस्थितःसःस्यामीतीत्वंशमुदमुउपशमेअशमदइमदितिअमोतःस्येःधाया

सोमसुतूयज्वासरसिजमूसरोजमूसंस्कारजः प्रजाअजःद्विजःपरितःखातापरिखा क्तक्तवतूधातोरतीतकालेक्तक्तवतूएतौस्तोभावकर्मणोः
स्नातमूकृतःघटःविष्णुर्विश्वंकृतवान्गत्यर्थादकर्मकाच्चकर्तरिक्तः भावकर्मणोरपिगङ्गांगतः स्थितःअमान्तस्योपधायादीर्घःङ्किंतिक्तेति
वौचशान्तःदान्तःश्लिषशीङ्स्थाआसवसजनरुहजीर्यतिभ्यश्चरामःसीतामाश्लिष्टः शेषमधिशयितःस्वर्गमधिष्ठितःहरिमुपासितःहरिदिन
मुपोषितःतमनुजातःवृषमारूढःजगदनुजीर्णःकोवासेठ॥ इतिदीर्घःशान्तःदान्तःश्लिषशीङ्स्थाआसवसजनरुहजीर्यतिभ्यश्चएभ्यःकर्तरिक्तःभावक
र्मणोश्चश्लिषआलिंगनेशीङ्स्वप्नेष्ठागतिनिवृत्तौआसउपवेशनेवसनिवासेजनीप्रादुर्भावेरुहबीजजन्मनिप्रादुर्भावेचजृवयोहानौ ... पूर्वाणांशीङ्स्थासामित्या।
धारस्य ... संज्ञाउपान्वध्याङ्पूर्वस्येतिवसआधारस्यकर्मसंज्ञाआश्लिषदितिआश्लिष्टोरामःसीतांअध्यशयिष्टेतिअधिशयितोहरिःशेषमध्यष्ठादितिअधिष्ठितस्स्वर्गं रामः
मूस्था ... तीत्वमूउपासिष्टेतिउपासितःसहरिंउपावात्सीदितिवसिक्षुधोरितीट्यजामितिसंप्रसारणमूघसादेरितिषःउपोषितःसहरिदिनंअन्वजनिष्टेतिजनसनखनामित्या ८
त्वंअनुजातःसत्त्वमूआरुक्षदितिहोढइतिढत्वमूतथोर्धइतितस्यधत्वमूष्टुत्वंचढिढेलोपइतिढलोपपूर्वदीर्घौआरूढःसवृषमूअन्वजारीदितिजरत इरि ॥

तीर्‌ग्र्योर्ह्रस्वसैट्‌ईंदीर्घ रइति तस्य नत्वम्‌ अनुजीर्णः सविश्वंकर्मणि तु गता प्राप्ता गंगा तेन आश्लिष्टा सीता रामेण अधिशयितः शेषो हरिणा अधिष्ठितः स्वर्गस्तेन उपा
सितो हरिस्तेन उपोषितं हरिदिनं तेन अनुजातो रामस्तेन आरूढो वृषस्तेन अनुजीर्णो विश्वसेन ॥ॐ॥ कोवा सेट्‌ उदुपधाद्‌ऽवृविकरणाद्‌ भावकर्मणोः सेट्‌ क्तो वा
कित्संज्ञः स्यात्‌ कित्वाऽभावे गुणः द्युतदीप्तौ अद्योतिइति द्युतितं द्योतितम्‌ तेनमुद हर्षे प्रामोदि इति प्रमुदितः प्रमोदितः साधुस्तेन उदुपधात्‌ किम्‌ विदितं भावकर्मणोः
किम्‌ रुचितवनम्‌ गत्यर्थादकर्मकादिति कर्तरि क्तः सेट्‌ किम्‌ कुष्टम्‌ कुष निष्कर्षे अवृविकरणात्‌ किम्‌ गुध्यते गुधितम्‌ शीङ्‌स्विदिमिदिक्ष्विदिधृषमृषपूः
ङः सेटौ क्तक्तवतू कितौ न अकित्वाद्गुणः अशयिष्टेति शयितः शयितवान्‌ सः कृत इतीट्‌ अनुबंधनिर्देशो यङ्‌लुगन्निवृत्त्यर्थः शेश्यितः शेश्यितवान्‌ नुधा

उदुपधात्सेट्‌ क्तो वा कित्‌ द्युतितम्‌ द्योतितम्‌ प्रमुदितः प्रमोदितः साधुः शीङ्‌स्विदिमिदिक्ष्विदिधृषमृषपूङः सेटौ क्तक्तवतू कितौ न शयि
तः शयितवान्‌ प्रस्वेदितः प्रस्वेदितवान्‌ क्ष्वेदितः क्ष्वेदितवान्‌ धर्षितः धर्षितवान्‌ मृषः क्षान्तौ मर्षितः मर्षितवान्‌ पूङो वा कित स्तस्य से

तोरितियः किंच स्विदादीनामादीदित इत्वाणि निषेधे प्राप्ते भावे कर्तरि चादित इति सेट्‌ कत्वम्‌ पूङः कित इत्वाणि ऐट्‌ पवितः पूतः पवितवान्‌ पूतवान्‌ कि
षेधे प्राप्ते पूङो वा कित इति सेट्‌ कत्वम्‌ ञिष्विदा स्नेहनमोचनयोरिति भ्वादिरत्र गृह्यते न तु विदा गात्रप्रक्षरणे दिवादिः ञीद्भिः साहचर्यात्‌ प्रास्वदिष्टेति प्रस्वेदित
श्चैत्रः स्वेदितं तेन प्रस्वेदितं तेन प्रस्वेदितवान्‌ सः स्विद्यते स्तुस्विदितः स्विदितवान्‌ ञिमिदा स्नेहने ञिक्ष्विदा स्नेहनमोचनयोः एतौ दिवादी भ्वादी च गृह्येते प्र दितः अ
मेदितवान्‌ प्रक्ष्वेदितः प्रक्ष्वेदितवान्‌ ञिधृषा प्रागल्भ्ये प्रधर्षितः प्रधर्षितवान्‌ प्रधर्षितस्तेन मृषः क्षांतौ मृषः सेटौ क्तक्तवतू कितौ न क्षमायामनर्थे मर्षितोम
र्षितवान्‌ क्षमायां किम्‌ अपमृषितं वाक्यम्‌ अविस्पष्टमित्यर्थः पूङो वा कित स्तस्य सेट्‌ पूङः परस्य कितस्तस्य सेट्‌ वा स्यात्‌ पूङ्‌ पवने कितं बुः सेट्‌ त्वतो वुरित्यनुवृत्तं ॥

उवर्णांत

सि॰ च॰ श्विश्रिक्त्तूर्णोवर्णतेभ्यः परस्य कितः प्रत्ययस्येण्नस्यादितिभूतः वृङ् संभक्तौवृञ् वरणेचवृतः श्रिञ् सेवायामुश्रितः टुओश्वि गतितद्ध्योः यजामिति संप्रसारण
कौ॰ उ॰ मुश्वयतेः संप्रसारणस्यदीर्घः शूनः वेञ् तंतुसंताने यजामिति संप्रसारणवेञोह्रस्वः उतं आदीदितः आच्चई च आदीतौ आदीतोइतौ यस्य स आदीदितू तस्मादादी
६ दितोधातोः क्तक्तवतोरिण्नस्यात् क्तनइत्यस्यापवादः ञीतांनकूवर्तमानेपिञिरितियेषांतेञीतस्तेषांमति बुद्धिपूजार्थञीङ्कः तकूस्यात्तूवर्तमानेऽर्थेमतिरिति हेत्वादुक्तेः प्र
यत्नुग्रहणात्राज्ञांमतः इष्टः तैरिष्यमाणइत्यर्थः बुद्धः विदितः पूजितोऽर्चितः दस्तस्यनोदश्चदात्परस्य कितस्तस्य नत्वं चाद्स्यापि नत्वंस्यात् भावेकर्तरिचादि
तः क्तक्तवतोरिडाआकारेतोधातोर्भावकर्त्राः स्थितयोः क्तक्तवतोरिडास्यात् ञिमिदास्नेहनेमिद्यतेइतिमिन्नंतेनऽश्वीङ् क्ष्विदिमिदीतिक्रमादित्वाद्गुणोऽदते

श्विश्रिभ्यांचपरस्यकितस्तस्य इण्नभूतः वृतः श्रितः श्वयतेस्संप्रसारणस्यदीर्घः शूनः वेञोह्रस्वःउतम् आदीदितः आदितईदितश्चक्तक्तवे
तोर्नेट् ञीतान्तकूवर्तमानेऽपिञीतांधातूनांमतिबुद्धिपूजार्थानांश्ववर्तमानेऽपितकूराज्ञाम्मतः तुडः इष्टः दस्तस्यनोदश्वदकारात्परस्य
कितस्तस्य [illegible] दकारस्यचमेदितम् मिन्नम् भावेकर्तरिचादितस्तुक्तक्तवतोरिडामेदितः मिन्नः प्रस्वेदितः प्रस्विन्नः क्ष्वेदितः क्ष्विण्णः अ
दोजघुः कितेनकारेजग्धमूरः रेफात्कितस्तस्य नत्वम् विकीर्णम् जीर्णम् ल्वाद्योदितश्चल्वादेरोदितश्च ज्ञातोः कितस्तस्य नोभवतिलूनः

इतिमेदितः सः ञिष्विदास्नेहनमोचनयोः प्रस्विद्यतेइतिप्रस्विन्नंतेनप्रस्वेदतेइतिप्रस्वेदितः सः ञिक्ष्विदास्नेहनमोचनयोः क्ष्विन्नंतेनक्ष्वेडितः सः अदोजघुः अदोजघुरा
देशः स्यात् कितितादौप्रत्ययेउकारउच्चारणार्थः तथोई इतिनस्य धः ऋवेजवादितिकस्यगः जग्धमूरः रात्कितस्तस्यनत्वंस्यात् कॄविक्षेपेजॄवयोहानौक्तइरितीर् एम॰
त्वादि॥ सेदितिदीर्घः विकीर्णः जीर्णमूल्वाद्योदितश्चल्वादेरेकविंशतेर्धातोरादितश्च कितस्तस्यनत्वंस्यात्क्र्यादेरंतर्गणोल्वादिः लूञ्१ स्तॄञ्२ कॄञ्३ वृञ्४ धूञ् ६
५ शॄ६ दॄ७ जॄ८ नॄ९ मॄ१० दॄ११ जॄ१२ नॄ१३ कॄ१४ ऋ१५ गॄ१६ ज्या१७ री१८ ली१९ व्री२० धी२१ इतिल्वादिः लूञ्छेदनेलूयतेस्मइतिलूनः लुनातिस्मेतिलूनवान् ॥

ज्यावयोर्हानौ ग्रहामिति संप्रसारणं जीनः प्यायः पीतिकिति प्यायः पी आदेशः स्यात् तादौ किति ओप्यायी वृद्धौ पीनः भुजो कौटिल्ये नत्वस्यासिद्धत्वेन कसपरत्वात् चोः कुरिति गः
भुग्नः ओहाक् त्यागे अपिहाधेती त्वं हीनः षूङ् प्राणिप्रसवे स्वादय ओदितः इत्योदित्वान्नत्वम् सूनः सूनवान् दिवादिरंतर्गणोयं स्वादिः षूङ् १ दूङ् २ दीङ् ३ डीङ् ४ धी
ङ् ५ मीङ् ६ रीङ् ७ लीङ् ८ व्रीङ् ९ स्वादयो नव दूङ् परितापे दूनः दूनवान् डीङ् विहायसा गतौ ओदिन्मध्ये डीङः पाठसामर्थ्यादि पन उड्डीनः दीङ् क्षये दीनः लीङ् श्ले
षणे लीनः रीङ् स्रवणे रीणः धीङ् आधारे धीनः दुग्वोर्दीर्घश्च दुगुभ्यां परस्य कितस्तस्य नत्वमनयोर्दीर्घश्च स्यात् गुपुरीषोत्सर्गे दुगतौ दुदु उपतापे अयं तु न गृह्यते
सानुबंधकत्वात् मदुनयादुनयादूतिमाघः दूनः गूनः क्षियो दीर्घः कर्तरि त क्तवत्वोर्नत्वं च क्षियः परयोः कर्तरि स्थितयोः क्तक्तवत्वोस्तस्य नत्वं क्षियो दीर्घश्च स्यात्
ज्यावयोर्हानौ जीनः प्यायः पीतिकिति पी[illegible] भुजो कौटिल्ये भुग्नः हीनः स्वादय ओदितः षूङ् प्राणिप्रसवे सूनः सूनवान् दूङ् परितापे दूनः मी
नः डीङ् उड्डीनः दीनः लीनः व्रीणः रीणः धीनः दुग्वोर्दीर्घश्च दूनः गूनः क्षियो दीर्घः कर्तरि क्तक्तवत्वोर्नत्वश्च क्षीणः क्षीणवान् कर्तरि किम् क्षि
मूयत्लसंयोगादेरातद्वन्तात् कितस्तस्य नत्वम् द्राणः ग्लानः म्लानः नुदविदोन्दत्राघ्राह्रीनिर्वाभ्यो वा त्राणः त्रातः घ्राणः घ्रातः ह्रीणः ह्रीतः नुत्तः नुन्नः व
क्षिक्षये क्षि निवासगत्योश्च क्षयति क्षेति क्षीणवान् कर्तरि किम् क्षीयते क्षेति क्षितं कामेन यत्लसंयोगादेरातदंतात् कितस्तस्य नत्वम् यत्लप्र ॥ द विचारणे वित्तः विन्नः।
[illegible] रातं संयोगादेराकारांतात् [illegible] नोः परस्य कितस्तस्य नत्वं स्यात् द्रा कुत्सायां गतौ द्राणः ग्लै म्लै हर्षक्षये ग्लानः म्लानः नुदविदोन्दत्राघ्राह्रीनिर्वाभ्यो वा एभ्यः कितस्तस्य
नत्वं वा स्यात् आख्यानां त्रयाणां दस्तस्येति नित्यं नत्वे प्राप्ते त्राघ्राह्रीनयोर्यत्लसंयोगादेरिति नत्वे प्राप्ते ह्रीवाक्नयोरप्राप्ते सति विभाषेयं नुद प्रेरणे नुत्तः नुन्नः विद विचारणे
रोषादिकरणं वगृह्यते उन्दिना परेण साहचर्यात् वित्तः विन्नः तथा च भाष्यम् वेत्तेस्तु विदितो निष्ठा विद्यतेर्विन्न इष्यते विन्तेर्विन्नश्च वित्तश्च भोगे वित्तश्च विंदतेरिति ॥

एकस्मिन् क्रियमाणे कार्यमादाविवांत
इवस्यात्

सि॰ चं॰ उन्दीक्लेदने आदीदितइतीण्ननोलोपइतिनलोपः उन्नः उत्तः त्रैङ्पालने त्राणः त्रातः घ्रागन्धोपादाने घ्राणः घ्रातः ह्रीलज्जायां ह्रीतः ह्रीणः वा गतिगंधनयोः अ वातेकर्तरि
कौ॰ उ॰ सतिनत्वं स्यात् निर्वाणोऽग्निर्मुनिर्वा मुक्तिंगतइत्यर्थः वातेकर्तरि तु निर्वातोवातः नितरांवातोगतइत्यर्थः गत्यर्थादितिकर्तरिक्तः दोदत्तिददातेर्ई शादेशः स्यात्किनितका
१ रेक्षिपूलेवने अस्यतुनव्या स्याभात्प्रयोगाभावाद्यथांतोयमादेशः किञ्च यदितांत आदेशस्तदाविदत्तमित्यादौ आयंतवदेकस्मिन्निति न्यायेननाम्यंतोपसर्गस्येतिदी
र्घः स्यात् यदिदान्तस्तदादस्तस्येतिनत्वंस्यात् यदिधांतस्तदातयोर्द्धइतिक्तस्यधः स्यात् खसेचपा इतियस्तः दत्तः दत्तवान् पितस्तुदानः स्वरान्तोवापक्षेदथादेशः ना
म्यंतोपसर्गस्यदीर्घोदादेशेतकारे नाम्यंतस्योपसर्गस्यदीर्घः स्यात् दास्थाने आदेशो यस्तकारस्तस्मिन्परे धाञोहिः किनितेदधातेर्हि रादेशः स्यात् किनितकारे ध्याध्याप्

उन्दीक्लेदने उन्नः उन्नः निर्वाणोमुनिर्वन्हयादौ निर्वातस्तुगतेऽनिलेदोदत्ति दाइत्यस्यदथकिनितकारेनतुपितः दत्तः दत्तवान् स्वरांतोवास्वरान्।
दुपसर्गादुत्तरस्यदाइत्यस्यतोवाकिनितकारेनतुपितः प्रत्तः प्रदत्तः अवत्तः अवदत्तः नाम्यन्तोपसर्गस्यदीर्घोदादेशेतकारे सुषुअदायिसूत्तमूनी
तम् धाञोहिः किनितेनिहितः ध्यास्याप्मूर्छिमदिभ्योननत्वम् ध्यातः ख्यातः पूर्तः मूर्तः मत्तः यजदंष्टम् उप्तं ऊढः व्येञ्संवीतः व्हेञ्हूतः उदितः
उक्तः वसनिस्तुधोरिट्त्वाक्तक्तवतूनाम् उषितः सुधितः सुप्तः॥ मूर्छिमदीभ्योननत्वम् आद्ययोर्यत्नसंयोगादेरितिनत्वेप्राप्तेइत्यस्यतुल्वादिषुपाठान्ल्वा
योदितइतिनत्वेप्राप्ते मूर्छतेस्तुच्छस्यलोपेक्तेरितिनत्वेप्राप्तेमाद्यतेस्तुदलस्येतिनत्वेप्राप्तेनिषेधः ध्यैचिंतायां ध्यातः ख्याप्रकथने ख्यातः पृपालनादौ पोरुरित्युरत्वो
विहसेक्तिदीर्घः किनइतीण्नपूर्तः मूर्छामोहसमुच्छाययोः रेफात्छ्वोरितिछलोपः आदीदितइतीण्नमूर्त्तः मदीहर्षे आदीदितइतीण्नमत्तः यजदेवपूजादौछशषे
निषत्वम् ष्टुत्वं यजादित्वात् यजामिनिसंप्रसारणं दहधं टुवपबीजतंतुसंतानेउप्तं वहप्रापणे होढइतिहस्यढः तयोर्धइतिक्तस्यधः ष्टुत्वं ढिढइतिढलोपपूर्वदीर्घो ऊढम्।
व्येञ्संवरणे वीतः ह्वेञ्स्पर्धायाम् हूतः वदव्यक्तायांवाचि क्तनइतीट् उदितः वचपरिभाषणे उक्तः वसनिस्तुधोरिट्क्ताक्तक्तवतूनांवसनिवासे यजामिनिसंप्रसारणंघसादेरि

रामः
१०

क्लिशिविदेटः क्तौ क्तवत्वोर्नेट् यस्य धातोः कुत्रचित्स्थले विकल्पेनेड्विहितस्तस्मोड्डातोः परयोः क्तक्तवत्वोरिण्न स्यात् ओव्रश्चूछेदने उदितो वेति वेट्त्वादिण्न ग्रहादिमिति संप्र-
सारणमत्वाद्योदितइति नत्वं नत्वस्यासिद्धत्वात् कसेपरतः छ्व्शोवेति षत्वे प्राप्ते क्तक्तवत्वोरादेशः षत्वं स्वरप्रत्यये ड्विधिषु सिद्धो वाच्य इति चोः कुरिति कुत्वम् स्कोरिति
सलोपः वृक्णः वृक्णवान् अंचेः पूजायामिट् पूजार्थादंचतेः परयोः क्तक्तवत्वोरिट् स्यात् उदितः क्त्वो वेडिति अंचेः क्त्वायां वेट्कत्वात् क्तविडेट इति निषेधे प्राप्ते सति
विधिः पूजार्थाचतेर्नेतिनस्यलोपो न अंचितः गमौ तु नो लोप इति न लोपः चोः कुरिति कः अक्तः जनी प्रादुर्भावे जनसनेत्यात्वम् जातः पचोवः पचतेः परस्य क्तक्तवत्वोस्तस्य वः
स्यात् डुपचष् पाके वस्यासिद्धत्वात् चोः कुरिति कः पक्वः क्षायोमः क्षायतेः परस्य क्तक्तवत्वोस्तस्य मः स्यात् क्षै क्षये ध्यक्षराणामित्यात्वं क्षामः प्रस्त्यः संप्रसारणं कितिन

नचिड्वेटः क्तक्तवत्वोर्नेट् व्रश्चूवृक्णः अञ्चेः पूजायामिट् अञ्चितः जातः पचोवः क्तक्तवत्वोस्तस्य पक्वः पक्ववान् क्षायोमः क्षामः क्षाम-
वान् प्रस्त्यस्तस्य संप्रसारणं ङ्किति तस्य मो वा प्रस्तीमः प्रस्तीतः शुषेः कः शुष्कः शुष्कवान् स्फायस्स्फी ङ्किति स्फीतः धेट् धीतम् गीतम् पीत-
म् दो दितम् सो सितम् मितम् सेटोः क्तक्तवत्वोर्णिलोपः चोरितः चोरितवान् पाचितः पाचितवान् ऊर्णोतेर्नेट् ऊर्णुतः ॥ समो वा प्रपूर्वस्य।

स्त्यायतेः संप्रसारणं स्यात् किति क्तक्तवत्वोस्तस्य मश्च वा स्त्यै ष्ट्यै शब्दसंघातयोः प्रस्तीमः प्रस्तीतः शुषेः कः शुषेः परस्य क्तक्तवत्वोस्तस्य कः स्यात् शुष शोषणे शुष्कः स्फा-
यः स्फी ङ्किति स्फायतेः स्फी आदेशः स्यात् तादौ किति स्फायी वृद्धौ स्फीतः धेट् पाने गै शब्दे पा पाने एषां त्रयाणामपि द्याधेतीत्वं धीतं गीतं पीतं दो अवखण्डने षोऽन्तक-
र्मणि माङ् माने मेङ् प्रणिदाने एषां स्यामीतीत्वं दितं सितं मितं सेटोः क्तक्तवत्वोर्णिलोपः णिप्रत्ययस्य लोपः स्यात् सेटोः क्तक्तवत्वोः परयोः चुर स्तेये क्तनइतीट्
णिलोपे चोरितः डुपचष् पाके ण्यन्तः क्तनइतीट् पाचितः ऊर्णोतेर्नेट् ऊर्णोतेरिण्न स्यात् तादौ किति ऊर्णुञ् आच्छादने ऊर्णुतः ऊर्णुतवान् ॥ ६ ॥

सि॰ चं॰ कृ॰ उ॰ ११

द्रवस्यकाठिन्ये स्पर्शे चार्थे श्यैङः संप्रसारणं क्तिनस्तस्य नत्वं च न तु स्पर्शे श्यैङः संप्रसारणं स्यात् द्रवरूपस्य द्रव्यस्य कठिनस्य भावः काठिन्यं तस्मिन् काठिन्येऽर्थे च पुनः द्रव्यस्य
स्पर्शेऽर्थे श्यैङः परस्य क्तिनस्तस्य नश्च स्यात् स्पर्शेऽर्थे नत्वं न श्यैङः यतो शीनं घृतम् स्पर्शे किम् शीतं जलं काठिन्ये स्पर्शे च किम् संश्यानो वृश्चिकः शीतात् संकुचित इत्यर्थः य
लद्रूं नोऽपूदेरिति नत्वम् अंचेः क्तिन् तस्य नत्वं न तु अपादाने अंचु गतिपूजनयोः न त्वस्यासिद्धत्वात् चोः कुरिति कः उदितः क्त्वो वेडिति क्त्वायां वेट्कत्वात् कश्चिद्वैदूदूतोऽन
समक्तः ऊनयादानेकिम् उदक्तमुदकं कूपात् दिवोऽविजिगीषायाम् दिवः क्तक्तवत्वोस्तस्य नः स्यात् विजेतुमिच्छा विजिगीषा तस्या वाच्यायां न त्वेन दिवु क्रीडावि
जिगीषा दौक्रिनिकृसे इति वस्य ऊठ् द्यूनः क्षीण इत्यर्थः आद्यूनः स्यादौदरिक इति हेमः विजिगीषायां तु द्यूतं द्यूते विजिगीषयाऽक्षाः पात्यन्ते इति अनुपसर्गात् फु

द्रवस्य काठिन्ये स्पर्शे चार्थे श्यैङः सम्प्रसारणं क्तिनस्तस्य नत्वञ्च न तु स्पर्शे शीनं घृतम् स्पर्शे तु शीतं जलम् अंचेऽक्तिनस्तस्य नत्वं न त्वपा
दाने समक्तः अन्यत्रोदक्तमुदकं कूपात् दिवोऽविजिगीषायाम् आद्यूनः विजिगीषायां तु द्यूतम् अनुपसर्गात् फुल्लक्षीबकृशोल्लाघानि ॥
पात्यन्ते फुल्लः फुल्लवान् क्षीबमदे क्षीबः कृशस्तनुः लाघृ शोषणसामर्थ्ययोः उल्लाघो नीरोगः उपसर्गात्तु चरफलोरत उदिति किति प्रफुल्लतः सू॰
प्रक्षीबितः प्रकृशितः प्रोल्लाघितः उत्फुल्लसंफुल्लौ च वित्तो भोगप्रत्यययोः वित्तं धनम् वित्तः पुरुषः अन्यत्र विन्नः भिन्नं शकलम् भिन्नम

फुल्लक्षीबकृशोल्लाघानि निपात्यन्ते ञिफला विशरणे क्तक्तवत्वोस्तस्य लत्वं निपात्यते चरफलोरत उदिति किति एतयोरस्य उत् स्यात् तादौ किति आद्रीदिनडूतीरानफुल्लः क्षी
बृ मदे कृश तनूकरणे लाघृ शक्तौ एषां त्रयाणां क्तस्य नलोपो निपात्यते तल्लोपस्यासिद्धत्वात् प्राप्तस्येटोऽभावश्च निपात्यते ननु फुल्ल विकसने लाघृ शक्तौ आभ्यां पचादेर रामः
इत्यप्रत्यये इतुराभ्यां नाम्युपधात् क इति कप्रत्यये फुल्लोल्लाघक्षीबकृशाः शब्दाः सिद्ध्यन्ति किमनेन उच्यते फुल्लतादिनिवृत्त्यर्थम् सूत्रम् उत्फुल्लसंफुल्लौ च उत्संपूर्वका ११
वप्यतौ निपात्यते केऽपंतर्हिलोधद्रुमसानुमतः प्रफुल्लामिति रघुः आङ्फुल्ल विकसने अस्मात् पचादेरित्यप्रत्यये प्रफुल्ल इति यद्यपि प्रफुल्लवदुत्फुल्लसंफुल्लावपि पचादे

भोगस्तस्मिन् भोगेऽर्थे प्रतीतः प्रसिद्धः तस्मिन् प्रतीतेऽर्थे च विदितः परस्य क्तस्य नत्वाभावो निपात्यते दस्तस्येति नत्वे प्राप्ते निषेधः विद्लृ लाभे वित्तः विद्यते विन्नः विद्यते वित्तः विन्नश्च वेत्तेर्वि
दितः विद सत्तायां विद विचारणे देवादिकरौधादिकावेतावनिटौ विद ज्ञाने विद्लृ लाभे आदादिकतौदादिकावेतौ सेटौ विद्लृ लाभे अस्य तु गमहनविदेति विकल्पः क्वसु प्रत्यये वेट्कत्वात्
क्वचिद्वेट्ट् इतीरान भिन्नं शकलं भिदेः परस्य क्तस्य नत्वाभावो निपात्यते शकलेऽर्थे दस्तस्येति प्राप्ते निषेधः भिन्नं शकलखंडे वेत्यमरः अन्यच्छिन्नम् विदीर्णमित्यर्थः ॥:॥ ऋणा
माधमर्ण्ये ऋगतौ अस्मात् क्तस्य नत्वं निपात्यते अधमं दुःखप्रदम् ऋणमस्य सोऽधमर्णस्तस्य भाव आधमर्ण्यं तस्मिन्नाधमर्ण्येऽर्थे अधमर्णोऽग्राहकः इत्यमरः क्षुब्ध १ स्वांत २
ग्र ५ ध्वांत ३ लग्न ४ म्लिष्ट ५ विरिब्ध ६ फांट ७ बाढानि मंथ १ मनः २ तमः ३ सक्त ४ विस्पष्ट ५ स्वर ६ अनायास ७ भृशेषु क्षुब्धादीन्यष्टावनिट्कानि निपात्यंते मंथादिष्वर्थेषु क्षुभ संच
ऋणमाधमर्ण्ये ऋतमन्यत्र क्षुब्धस्वान्तध्वांतलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमस्सक्ताविस्पष्टस्वरानायासभृशेषु क्षुब्धो म
न्थः स्वन शब्दे स्वान्तं मनः ध्वान्तं तमः लगे संगे लग्नं सक्तम् म्लिष्टमविस्पष्टम् रेभृ शब्दे विरिब्धः स्वरः फाण्टमनायाससाध्यः कषायविशेषः
बाह्र प्रयत्ने बाढम् भृशम् अन्यत्र तु क्षुभितम् स्वनितम् ध्वनितम् धृष्टविशस्तावविनये धृष्टः विशस्तः अन्यत्र धर्षितः विशसितः दृढ
लने त योरीडिति तस्य धः ञवेज वाद्दति भस्य वः क्षुब्धः स्वन ध्वन शब्दे त्नमांतस्येति दीर्घः स्वान्तम् ध्वांतम् लगे संगे नत्वमपि निपात्यते लग्नम् म्ले ॥ स्थूलबलयोः दृह दृहि वृद्धौ
क्त अव्यक्ते शब्दे रेभृ शब्दे अनयोः कृपधायादृत्वमपि निपात्यते छ शषेति षत्वं ष्टुत्वं म्लिष्टं तयोरीडिति धः कवेदिति भस्य वः विरिब्धः फण गतौ त्नमांतस्येति दीर्घः ष्टुत्वम् णस्यानु
स्वारो निपात्यते फांटं बाह्र प्रयत्ने हो ढ इति ढः तयोरीडिति तस्य धः ष्टुत्वं ढि ढ इति ढलोपे बाढं कथं तर्हि क्षुब्धो राजेति आगमजमनित्यमित्यागमस्यानित्यत्वादिडभावः धृ
ष्ट शस्तावविनयेऽविनयेऽर्थे एतावनिटौ स्तः ञिधृषा प्रागल्भ्ये अस्य आदीदित इतीण्निषेधे सिद्धे शसु हिंसायामस्य उदितः त्वोवेडिति क्त्वायां वेट्कत्वात् क्वचिद्वेट्ट् इतीण्नि
षेधे सिद्धे अविनयेऽर्थे एवानिट्त्वं नान्यत्रेति नियमार्थं सूत्रं विनये तु धर्षितः ञीदः स्विदि मदीति क्तस्य किन्त्वाद्गुणः दृढः स्थूलबलयोः स्थूलो मांसलस्तस्मिन्नर्थे बलमस्यास्तीति वा

सि॰चं॰ आभ्यां परस्य क्तप्रत्ययस्य ढत्वं धातोरिडभावह्लोपौ च इदितो नलोपश्च निपात्यते दृढः ननु ह्रोढ इति ढत्वे तयोर्ईड् इति धत्वे ष्टुत्वे च ढि ढ इति ढलोपे कृते दृढे ति रूपसि
उ॰कृ॰ द्धौ सत्यां किमर्थं ढत्वहलोपयोर्निपातनम् उच्यते तथाहि सति ढलोपस्यासिद्धत्वेन अलघुत्वात् द्रढिमेत्यत्र ऋतो रइ मनीति रभावो न स्यात् परिद्रढय्य गत इत्यत्र परिव्र
१२ ढी[illegible]णामथातोः क्यप्रत्यये कपिलघुपूर्वात्परस्य ञेरिति ञेरयादेशो न स्याच्च अतोऽसिद्धत्वनिवृत्तये निपातनं प्रभौ परिवृढः प्रभौ वाच्ये वृह वृहि वृद्धौ आभ्यां तर
स्य क्तस्य ढत्वं धातोरिडभावह्लोपौ च इदितो नलोपश्च निपात्यते प्रभुः परिवृढोऽधिप इत्यमरः अत्रापि ढत्वहलोपयोर्निपातनं व्रढिमा परिव्रढय्येत्यादिसिद्ध्यर्थं प्र
गूवदेव कृच्छ्रगहनयोः कषः एतयोरर्थयोः कषः परस्य क्तस्येण्न स्यात् स्यात्कष्टं कृच्छ्रमाभीलमित्यमरः अत्र कष्टशब्देन दुःखं तत्कारणं च गृह्यते कष हिंसायां कष्टो
मोहः दुःखहेतुरित्यर्थः कष्टं शास्त्रं दुरवगाहमित्यर्थः घुषेरविशब्दने विशब्दनः प्रतिज्ञानं न विशब्दनमविशब्दनं तस्मिन्नर्थे घुषेः परस्य क्तस्येण्न स्यात् घुषिर् [illegible]

दृहितो दृंहितोऽन्यः दृह दृहि वृद्धौ प्रभौ परिवृढः परिवृहितः परिवृंहितोऽन्यः कृच्छ्रगहनयोः कष्टम् कष्टो मोहः कष्टं शास्त्रम् कषितम
न्यत् घुष्टोऽविशब्दने घुष्टा रज्जुः अविशब्दने किम् घुषितम् वाक्यम् अभ्यर्णमाविदूर्ये अभ्यर्दितमन्यत् क्षीरहविषोः पाके श्रृतम् अन्यत्र

र्थे भ्वादिः घुषिर् अविशब्दने चुरादिः द्वयोरप्यत्र ग्रहणं ननु विशब्दनेऽर्थे इण्निषेधाभावात् ञिप्रत्यये उपधागुणे कृते सेटोः क्तक्तवत्वोरिति **॥ श्राणम् श्रपितमन्यत् ॥**
ञिलोपे घोषितमित्यपि स्यात् अत्राहुः विशब्दनेऽर्थे चुरादेर्णिरेवानित्य इति अभ्यर्णमाविदूर्ये अर्देः परस्य क्तस्येण्न स्यात् आविदूर्येऽर्थे विशेषेण दूरं विदूरं न विदूरमविदूरम् अ
विदूरस्य भावः आविदूर्यं ण्यः अर्द गतौ याचने च रदाभ्यामिति तदयोर्नत्वं अभ्यर्णम् नातिदूरमासन्नं वा क्षीरहविषोः पाके श्रृतं श्रायतेः श्रृ आदेशो निपात्यते श्रा पाके अ रामः
दादौ चुरादौ च घटादावपि पठ्यते श्रै पाके भ्वादौ अस्यापि कृतात्वस्येह ग्रहणं निपातनसामर्थ्याल्लक्षणप्रतिपदोक्तयोरिति परिभाषा नाश्रियते श्रृतं क्षीरं स्वयमेव विक्लिन्नं १२
पक्वं वेत्यर्थः क्षीरहविर्भ्यामन्यत्तु श्राणं यलसंयोगादेरिति नत्वं श्रपितं [illegible]कादिमितां ह्रस्व इति ह्रस्वः ॥ ६ ॥ ॥ ॥

दान्तादयो वा निपात्यन्ते दान्तादयः सप्त णिप्रत्यये क्ते सति क्तप्रत्यये वा निपात्यन्ते शमु दमु उपशमे जनी जृष इति मित्त्वादुपधाया ह्रस्वः एषां सप्तानां निपातना
दिड्भावः णेरनिटि णिलोपश्च अनुनासिकस्येति दीर्घः दान्तः शान्तः पूरी आप्यायने दिवादौ चुरादौ च रदाभ्यामिति तस्य नत्वं पूर्णः दसु उपक्षये स्पश बाधने छद अपवारणे एषां
न यणां इड्भावो निपात्यते दस्तः स्पष्टेति षत्वं ष्टुत्वं स्पष्टः दस्तस्येति तदोर्नत्वं छन्नः ज्ञप ज्ञाने ज्ञापने यो मित् त्वरादिर्मित्वादुपधाया ह्रस्वः ज्ञप्तः पक्षे क्त इति
दू से ठोंक क वचोरिति णिलोपः ७ मितइत्यादि रुधादिभ्यः पंचभ्यः क्तस्य इडागमो वा निपात्यते रुष रोषे इट् घुस दहे इति वेट्कत्वात् कचिदिट् इति निषेधे प्राप्ते विकल्पो
निपात्यते रुष्टः रुषितः अम गत्यादिषु अम रोगे इति चौरादिकस्तु न गृह्यते एकस्वरादित्यधिकारात् अनुनासिकस्येति दीर्घः आन्तः अमितः त्वर संभ्रमे आदीदितः
दान्तादयो वा निपात्यन्ते दान्तः दमितः शान्तः शमितः पूर्णः पूरितः दसु उपक्षये दस्तः दासितः स्पष्टः स्पाशितः छन्नः छादितः ज्ञप्तः ज्ञपितः
रुष्टः रुषितः आन्तः अमितः तूर्णः त्वरितः संघुष्टः संघुषितः आस्वान्तः आस्वनितः हृष्टम् हृषितम् हृषतुष्टौ अपचायितः अपचितः प्या
नः पीनः ह्लादी सुखे ह्लादेर्ह्रस्वः क्तिनि ते प्रह्लन्नः ५ तिनिषेधे प्राप्ते इड्विकल्पो निपात्यते ञित्वरा त्वरेत्यूः र इति क्तस्य नत्वं तूर्णः त्वरितः घुषिर् अविशब्द
ने घुष्टोऽविशब्दने इति विशब्दनेऽर्थे नित्यमिटि प्राप्ते विकल्पो निपात्यते संघुष्टः संघुषितः स्वन शब्दे अनुनासिकस्येति दीर्घः आस्वान्तः आस्वनितः आङ्पूर्वस्य स्वनेर्मनोभि
धाने एव विकल्पः परत्वात् आस्वान्तं आस्वनितं वा मनः हृषु अलीके अस्योदित इति क्त्वायां वेट्कत्वात् कचिदिट् इति निषेधे प्राप्ते हृष तुष्टौ सेट्त्वाद्रसनित्य
मिति प्राप्ते विकल्पो निपात्यते उभयोरिह ग्रहणं हृषितं लोम हृष्टोऽहृषितो मैत्रः विस्मितः प्रतिहतो वेत्यर्थः चाय पूजानिशामनयोः अस्य च आदेशो निपात्यते वीके
अपचितः अपचायितः ओप्यायी वृद्धौ अस्य पी इति निपात्यते वा क्ते आदीदित इति निषेधः यवयोर्वेसेइति यत इति वा पूलोपः स्वादय ओदित इति गत्वं प्यानः पीनः स्वेदः
स्वाङ्गेनिष्ठं पीनं मुखं सोपसर्गस्य न प्रप्यानः आङ्पूर्वस्य तु स्यादेव आपीनः कूपः आपीनमूधः ह्लादो ह्रस्वः क्तिनि ते ह्लादी सुखे आदीदित इति एन दस्तस्येति नत्वं प्रह्लन्नः ॥

सि॰कौ॰ निनदीभ्यांस्नातेः सस्यषः कौशले आभ्यां स्नातेः सस्यषः स्यात् कौशले गम्ये शास्त्रेषु निष्णातः कुशलः नद्यां स्नातो नदीष्णातः नदीस्नाने कुशलः नाम्नि चेति ङः स्थैर्य्यगतिभ
कृ॰ उ॰ क्षणार्थेभ्योऽधिकरणेऽपि क्तः एभ्य आधारे यः क्तः स्यात् अपि शब्देन यथाप्राप्तं मुकुंदस्यासितमिदमिदं यातं रमापतेः भुक्तमेतदनंतस्येत्यूचुर्गोप्यो दिदृक्षवः द्रष्टु
१३ दिदृक्षुमिच्छवो दिदृक्षंते दिदृक्षंते इति दिदृक्षवो गोप्य इत्यूचुः इतीति किम् मुकुंदस्य कस्य स्येदमासितं आस्यतेऽस्मिन्नित्यासितमासनं रमापतेर्विष्णोरिदं यातं याय
तेऽस्मिन्निति यातं मार्गः अनन्तस्य हरेरेतद्भुक्तम् भुज्यतेऽस्मिन्निति भुक्तम् भोजनम् मुकुन्दस्येत्यादित्रिषु वर्त्तमानाधारार्थक्तस्य योग इति कर्त्तरि षष्ठी पक्षे आसे
र्कर्मकत्वात् कर्त्तरि भावे च क्तः आसितं आसितं तेन गत्यर्थेभ्यः कर्त्तरि कर्म्मणि च क्तः ग्रामं यातः सः ग्रामो यातस्तेन भुजेः कर्म्मणि क्तः तेन भुक्तमन्नम् कथं तर्हि
भुक्ता ब्राह्मणाः पीता गाव इत्युच्यते भुक्तमस्त्येषामिति अस्त्यर्थे अः जीर्य्यतेरतृ जृष् वयोहानौ अस्माद्भूतेऽर्थे अतृ प्रत्ययः स्यात् अतृ प्रत्ययमाह ऋदित्वात् त्रितो नुम्
त्रिनदीभ्यां स्नातेस्सस्यषः कौशले निष्णातः नदीष्णातः स्थैर्य्यगतिभक्षणार्थेभ्योऽधिकरणेऽपि क्तः तथाच मुकुन्दस्यासितमिदमिदं यातं रमाप
तेः भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः २ जीर्य्यतेरतृ जरन् जरन्तौ क्वसुकानौ णवेवत् धातोरतीते काले एतौ भवतः तौ च यथाक्रमं
णवेवत् द्वित्वम् संयोगान्तस्य लोपः चकृवान् वसोर्वउः ॥ मितिनुंम् ऋतो गुणे कृते नामत्वात्स्या दौ संयोगान्तस्येति तलोपः तलोपस्यासिद्धत्वान्नोपधाया इति
दीर्घो भवति न जरन् स्त्री जरती क्त क्तवत्वोः जीर्णवान् कसुकानौ णवेवत् नतसामान्ये क्वसुकानौ प्रत्यया वा द्वक्वसोः ककारो गुणनिषेधार्थः उकारस्तु पुंसि त्रितो नुमि
ति नुमर्थः स्त्रियांतु ष्ट्रितदतीवर्यः कानप्रत्ययस्य कित्करणं तस्लिराणदृन्त्र ऋ संयोगादित्य कित्वाद्गुणस्य निषेधार्थम् णवादिपरे यत्कार्य्यं द्वित्वादि तत्सर्वमन । राम
योः परयोरपि स्यात् इकृञ् करणे द्वित्वादि चकृवसिति जातं नाम संज्ञायां स्यादिः नुसम्महंतद इति पुंसि पंच सुदीर्घः स्त्री वेतु स्रोदीर्घः संयोगान्तस्येति सलोपः चकृ १३
वान् चकृवांसौ चकृवांसः चकृवांसम् चकृवांसौ शसादौ तु वसोर्वउ रित्युत्वे कृतरमिति रः ॥

चक्षुषः चक्षुषा वसां सदृतिसस्य दत्वे चक्षुवद्भ्यां चक्षुर्वद्भिरित्यादि स्त्रियां तु ष्टितदृती पूर्ववसोर्वेउरित्युत्वे षत्वे च चक्षुषी क्लीवे तु चक्षुवत् चक्षुवांसि भञ्जसे ... वभञ्ज्वान्
वभुजुषी स्त्री जागृ निद्राक्षये जजागृवान् जजागृषी स्त्री द्वित्वे सत्येकस्वरादादन्तात् घसेश्च वसोरिट् नान्यस्मात् द्वित्वे कृते सति एकस्वराद्धातोरादन्तात् धातोः घसेश्च परस्य
वसोरिट् स्यात् नान्येभ्यः परस्य वसोः कृते पि द्वित्वे एकस्वराये धातवो ऽवशिष्यन्ते तेभ्य इत्यर्थः ह्वयत्योरिति निषेधं वाधित्वा क्रादेरिति नियमात्सर्वत्र प्राप्तस्येटो नियमोयम्
६४ गमहनविदविशांवा एभ्यः परस्य वसुप्रत्ययस्येड्वा स्यात् विशिना साहचर्यात् विदॢ लाभे इत्यस्य ग्रहणं भू सत्तायां वभूवान् वभूवांसौ शसादौ तु वसोर्वेउरित्युत्वे कृते भुवो वुगि
ति वुक् वभूवुषः वभूवुषा वभूवद्भ्यामित्यादि वभूवुषी स्त्री अद भक्षणे द्वित्वहलादिशेषपूर्वदीर्घसवर्णदीर्घेषु कृतेषु कृते द्वित्वे प्ययमेकस्वर एवेति इट् च भवति

चक्षुषः चक्षुषा वसां रसे चक्षुवद्भ्याम् चक्षाणः वभञ्ज्वान् जजागृवान् द्वित्वे सत्येकस्वरादादन्ताद्घसेश्च वसोरिट् नान्यस्मात् गमहन
विदविशदृशां वा वभूवान् भुवो वुक् वभूवुषः वभूवुषा अद भक्षणे आदिवान् ऋ गतौ आरिवान् डुदाञ् दाने ददिवान् दरिद्रि
वान् वसौ विदृ इडभावः आदुषः जघ्निवान् जक्षिवान् जग्मिवान् ॥ आदिवान् वसौ कृते इडभावो भवति निमित्ताभावे नैमित्तिक
स्याप्यभाव इत्युक्तत्वात् आदुषी स्त्री ऋ गतौ गुणोर्त्तीति गुणे कृते द्वित्वादिषु कृतेषु अप्येकस्वरः इट् च भवति आरिवान् आरुषी स्त्री डुदाञ् दाने कृते द्वित्वेना
यमेकस्वरः अनेकस्वरत्वादिण्निषेधे प्राप्ते सूत्रे आदन्तग्रहणादिट् भवति आतो नपीत्यालोपः ददिवान् ददुषी स्त्री दरिद्रा दुर्गतौ आदन्तग्रहणादिट् आतो नपीत्या
लोपः ददरिद्रिवान् ददरिद्रुषी स्त्री अद भक्षणे लिट्यन्यतरस्यामिति घस्लृ इति लिटि वा घस्लृ आदेशः द्वित्वे कृते नायमेकस्वरः सूत्रे घसेर्ग्रहणादिट् उपधालोपात्प्रागेव द्वित्वं
पश्चाद्गमहनेत्युपधालोपः घसादेः ष इति षत्वम् खसे च पादिति घस्य कः जक्षिवान् जक्षुषी स्त्री गम्लृ गतौ गमादीनां चतुर्णामिड् वा द्वित्वादि गमहनेत्युपधालो
पः जगामेति जग्मिवान् इडभावे मो नो धातोरिति मस्य नः ॥

जगन्वान् जग्मुषी स्त्री श्रेयांसि सर्वाण्यधिजग्मुषस्ते इति रघुः हनदिंसागत्योः द्वित्वादि गममामित्युपधालोपः हनो घ्न इति हस्य घः जघ्निवान् इडभावे पूर्वाङ्गं तेरिति पर
स्य हस्य घः जघन्वान् जघ्नुषी स्त्री विद्लृ लाभे विविदिवान् इडभावे विविद्वान् विविदुषी स्त्री विश प्रवेशने विविशिवान् विविश्वान् विविशुषी स्त्री इण् गतौ द्वित्वं इणः प
रस्य वसोरिड् निपात्यते द्वित्वे सत्येकस्वराभावाद् द्विधिरयम् इणः कितिणादाविति पूर्वदीर्घः सवर्णदीर्घ इति सूत्रं बाधित्वा नित्यत्वादिणः क्विति स्वर इति यः वसोरिडागम
स कितस्वरस्य परत्र सत्वात् ईयिवान् ईयुषी स्त्री षद्लृ विशरणादौ द्वित्वादि लोपः पचामित्येत्व पूर्वलोपो इट् सेदिवान् सेदुषी स्त्री निषेदुषीमासनबन्धधीर इति रघुः व
स निवासे द्वित्वादि णिवादौ पूर्वस्येति पूर्वस्य संप्रसारणं यजामिति परस्य संप्रसारणं सवर्णदीर्घ इति दीर्घे कृते एकस्वरत्वादिट् घसादेरिति षः ऊषिवान् ऊषुषी स्त्री अ

जगन्वान् जग्मुषः जघ्निवान् जघन्वान् जघ्नुषा विविदिवान् विविद्वान् विविदुषः विविशिवान् विविश्वान् ददृशिवान् ददृश्वान् ईयिवा
न् सेदिवान् ऊषिवान् शुश्रुवान् शुश्रुवुषः शतृशानौ तिप्तेवत् क्रियायाम् क्रियायां गम्यमानायां धातोः शतृशानौ भवतः सोचति तिप्तेवत् पच
न्नास्ते पठंस्तिष्ठति गायन्नागच्छति मुगाने तः अकारस्याने मुगागमः स्यात् पचमानः पठति मन्वानः कुर्वाणः दादेरिः पीयमानः सोमो भव
तादीयमाना गौः आसेरानईः आसेः परस्यानईः स्यात् आसीनः ॥ धृष्णुषस्त्वामभवज्ज्ञनस्येति माघः श्रु श्रवणे शुश्रुवान् शुश्रुवुषी स्त्री शतृशानौ
तिप्तेवत् क्रियायां शतृशानप्रत्ययौ भवतः उभयोः शित्वाच्चतुर्वत्कार्यं अदित्वात् पुंसि स्त्रियोर्नुमिति नुम् स्त्रियां तु टित इति ङीप् पचन्तीति अपूपपचन् विक्लित्त्यनुकू
लवर्तमानव्यापाराश्रयश्चैत्रः मुगाने तः अदन्तस्य मुगागमः स्यादाने परे पचत इति पचमानः मनुते इति मन्वानः कुरुते इति कुर्वाणः उभयत्र उपूङित्यदुरित्य
त उत् पीङ् पाने दीङ् क्षये दैवादिकौ विभीषणवाचापानेङ् दाञ् दाने आभ्यां कर्मणि शानप्रत्यये कृते यक् च तुर्थिति यक् दादेरिरितीत्वं ये इति दीर्घः दीयमानः पीय
मानः आसेरानईः आनस्य आतः ईत्वं आस उपवेशने आस्ते इति आसीनः ॥

वादीपोः शतुः अवर्णात्परस्य शतृप्रत्ययस्य नुम् वा स्यात् ईपि ईकारे तुदतीति तुदन् तुदंतौ तुदंतः स्त्रियां तु तुदती तुदंती कुले वेतु तुदत् तुदती तुदंती तुदंति अ
प्यपोरान्नित्यम् अप् य प्रत्ययाभ्यां परस्य शतुर्नित्यं नुम् स्यात् ईपि ईकारे भवतीति पुंसि भवन् भवंतौ स्त्रियां तु भवंती कुले तु भवत् भवंती भवंति दीव्यतीति दीव्यो
विहसेदिति दीर्घः दीव्यन् दीव्यन्तौ स्त्रियां तु दीव्यंती कुले तु दीव्यत् दीव्यंती दीव्यंति ददातीति दधातीति च ह्वादेद्विश्चेति द्वित्वादिदादेरित्याल्लोपः ददत् सः ददती [illegible] स्त्री ददत्
ददती ददंती ददंति दधत् सः दधती दधंती स्त्री दधत् दधती दधंती दधंति विदेर्वा वसुः वसोरुदित्करणं वसोर्वे उरित्युत्वार्थम् नुम् तु स्यान्निवर्त्तेनैव सिद्धः वेत्तीति अपि
त्वादेर्ङिदिति वसुश्शतोर्ङित्वं ङित्वाद्गुणो न विद्वान् विदन् विदुषी स्त्री माङ्याक्रोशे माङि उपपदे निंदायामर्थे धातोः शतृप्रत्ययः स्यात् माङिसिरेवेति लुङिप्राप्ते लङ्॥

वादीपोश्शतुः अवर्णात्परस्य शतुर्वा नुमीकारे ईपिपरे तुदन् तुदती तुदन्ती कुले स्त्री वा अप्ययोरान्नित्यम् भवत् भवन्ती दीव्यत् दीव्य
न्ती दीव्यन्त्यौ गंगायमुने द्विरुक्तानां जक्षादीनां च परस्य शतुर्नुम्न शो वा ददत् दधत् विदेर्वा वसुः वेत्तेः परस्य शतुर्वा वसुरादेशः विद्वान्
विदन् माङ्याक्रोशे मा जीवन् लक्षणहेत्वोः क्रियायाः शयाना भुञ्जते यवनाः अर्ज्ज प्रतियत्ने चुरादिः अर्ज्जयन्वसति भविष्यति स्य
पूर्वं शतृशानचौ परः हन्तृ तस्य पः करिष्यन् करिष्यमाणः ताच्छील्यवयोवचनशक्तिषु चानश् भोगम्भुञ्जानः कवचम्बिभ्राणः शत्रून्निघ्नानः॥

धिः जीव प्राणधारणे मा जीवन् लक्षणहेत्वोः क्रियायाः क्रियायाः चिन्हे हेतौ चार्थे वर्त्तमानाद्धातोः शतृशानौ स्तः अत्र हेतुशब्देन फलं कारणं चोच्यते शेरतेरिति शीङो यु
ङिति गुणः शयानाः भुंजते यवनाः यवनकर्तृक भोजनस्य शयनं लक्षणं अर्ज प्रयत्ने चुरादिः अर्जयतीति अर्जयन् वसति अर्जनार्थो वास इत्यर्थः भविष्यति स्य पू
र्वं शतृशानचौ परः भविष्यत् स्य वंतादाद्धातोः परयोरनयोः स्थाने शतृशानौ वा स्तः करिष्यतीति करिष्यन् सिसते नी टूकरिष्यते इति करिष्यमाणः ताच्छील्यवयोव
चनशक्तिषु चानश् ताच्छील्यं तत्स्वभावता वयो यौवनादिः शक्तिः सामर्थ्य एषु द्योत्येषु धातोः कर्तरि आनश् स्यात् आनश् प्रत्ययमाह हशि स्त्रोश्च तुर्वेत् कार्यं
परस्मैपदिभ्योप्यानश् स्यात् एतदर्थमिदं भुनक्तीति रुधादित्वान्नम् नमसोऽस्येत्यल्लोपः भुंजानः विभर्त्तीति विभ्राणः हंतीति गमामित्युपधालोपः हनो घ्नेरिति ह

सि॰ चं॰ कृ॰ उ॰ ५५ इङ्धार्योरकृच्छ्रिणिकर्तरि शतृ अकृच्छ्रः सुखसाध्योधात्वर्थः आभ्यां शतृ प्रत्ययः स्यात् अकृच्छ्रिणिकर्त्तरि पुनः शतृ प्रत्ययमाह इङ् आत्मनेपदित्वात् शतृ प्रत्य
योनसिद्ध्यति धारयतेरपि आत्मगामिनि क्रियाफले शतृ प्रत्ययोनसिध्यति तदर्थोयमारंभः इङ् अध्ययने अधीते इति अदादित्वाद पोलुक् नुधातोरितीय् अधीयन्
धारयते इति अपि धारयन् द्विषः शत्रौ द्विष् अप्रीतावस्मात् शत्रौ वाच्ये शतृ प्रत्ययः स्यात् द्वेष्टीति द्विषन् अर्ह पूजायां अर्ह पूजायामस्मात् शतृ प्रत्ययः स्यात् पूजायाम
र्थे अर्हतीति अर्हन् शीलेतृन् प्रत्ययमाह नकारः स्वरार्थः इतः परं वक्ष्यमाणाः प्रत्ययाः ताच्छील्यादिषु बोध्याः करोतीत्येवं शीलः कर्ता करम् इष्णुस्नुक्नु शीलेधा
तोरेते प्रत्ययाः शीलेऽर्थे इष्णुस्नुक्नु प्रत्ययानाह क्नुककारो गुणनिषेधार्थः अलंकरोतीत्येवं शीलोऽलंकरिष्णुः निराकरोतीत्येवं शीलो निराकरिष्णुः जनी प्रादुर्भा

इङ्धार्योरकृच्छ्रिणिकर्तरि शतृ इङ् अध्ययने अधीयन् धञ् धारणे ण्यन्तः धारयन् द्विष अप्रीतौ द्विषश्शत्रौ द्वेष्टीति द्विषन् अर्ह पू
जायाम् अर्हन् शीलेतृन् करं कर्ता हञ् हर्ता इष्णुस्नुक्नु शीले अलंकरिष्णुः निराकरिष्णुः जनी प्रजनिष्णुः जिभुवोर्नेट् गुणोस्नौ जिजये जि
ष्णुः भूष्णुः ग्लास्नुः त्रस्नुः त्रैङ् त्रास्नुः गृध्नुः ञिधृषा धृष्णुः क्षिपः क्षिप्नुः षाकोकणः शीलार्थे षाक उ ऊकण् प्रत्यया भवन्ति जल्पाकः भिक्ष याञ्चा
याम् भिक्षाकः कुट्ट च्छेदे कुट्टाकः दुष्टः लुण्ठ चौर्ये लुण्ठाकः वृङ् संभक्तौ वराकः ॥ वे प्रजायत इत्येवं शीलः प्रजनिष्णुः जिभुवोर्नेट् गुणोस्नौ जय
तीत्येवं शीलो जिष्णुः भवतीत्येवं शीलो भूष्णुः ग्लायतीत्येवं शीलो ग्लास्नुः त्रसी उद्वेगे क्नुः इवत्योरितीप्सन् त्रस्नुः गृधु अभिकांक्षायां गृध्नुः ञिधृषा प्रागल्भ्ये धृष्णुः क्षिप प्रे
रणे क्षिप्नुः षाकोकणः षाक उ ऊकण् प्रत्ययानाह षाकस्य षः इत् तदितीवर्थः उकणोणो वृद्ध्यर्थः जल्पतीत्येवं शीलः जल्पाकः भिक्ष भिक्षायां भिक्षाकः कुट्ट च्छेदने लुं राम:
ठ स्तेये चौरादिकाविमौ कुट्टाकः लुण्ठाकः वृञ् वरणे वृङ् संभक्तौ वराकः सनाशंसभिक्षिभ्यः उः सः प्रत्ययः तदंतो धातुः सांत उच्यते आङः शंसु इच्छायामयमेव गृ १५
ह्यते न तु शंसु स्तुतौ आङा सह निर्देशात् भिक्ष भिक्षायां ॥

सि॰ कौ॰ उ॰ ९६

विवेकी त्यजहानौ त्यागी रञ्जदीप्तौ रागी भजसेवायां भागी कषहिंसायां विकाषी लसश्लेषणक्रीडनयोः विलासी लपव्यक्तायां वाचि प्रलापी सृगतौ प्रसारी मथ विलोडने प्र
माथी वसनिवासे प्रवासी निन्दादेर्वुञ् वुण्प्रत्ययेनापि सिद्धे वुञ्वचनं ज्ञापकम् शीलादिप्रत्यये‌षु नाऽऽदयो न भवन्तीति वुञ्प्रत्ययमाह नित्वाद्वृद्धिः युवोरनाकावित्यका
देशः निदि कुत्सायां निन्दकः हिसि हिंसायां हिंसकः क्षिप प्रेरणे क्षेपकः वद व्यक्तायां वाचि ण्यन्तः णेरनिटि णिलोपः परिवादकः चलनशब्दार्थादकर्म्मकाद्युच्
लनार्थादकर्मकात् शब्दार्थाच्च युः स्यात् युप्रत्ययमाह युवोरित्यनादेशः चल कंपने चलनः चुप मंदायां गतौ चोपनः कपि चलने कंपनः शब्द शब्दने अदंतः चु
रादिः णेरनिटि णिलोपः शब्दनः रु शब्दे रवणः अकर्मकात् किम् पठिता विद्या अनुदात्तेतो हसादेरकर्मकाद्युः स्यात् वृतु वर्त्तने वर्त्तनः अनुदात्तेतः किं भविता हसादेः किम्

विवेकी त्यागी असिद्धसिञ्जनेऽकेधिनु णिरञ्जेर्णलोपो वाच्यः रागी भागी विकाषी विलासी प्रलापी प्रसारी मथहिंसायाम् प्रमाथी प्रवासी निन्दा
देर्वुञ् निन्दकः हिंसकः परिक्षेपकः परिवादकः चलनशब्दार्थादकर्म्मकाद्युः चुप मन्दायाङ्गतौ चोपनः चलनः कम्पनः शब्दनः रवणः अनु
दात्तेतो हसादेरकर्म्मकात् वर्तनः रमणः ज्वादेश्च जु गतौ वेगे च जवनः सरणः गर्द्धनः क्रोधनः रोषणः मण्डनः भूषणः ज्यादेरिनिः जयी
प्रजवी दरी क्षयी दादेरुः दारुः धारुः सेरुः सघस्यदः क्मरः सृमरः घस्मरः अद्मरः भञ्जभासमिदो घुरः भङ्गुरः भासुरः मेदुरः ॥ एधिता अकर्मका
त्किं वसिता वस्त्रं ज्वादेश्च युः स्यात् जु गतौ वेगे च जवनः सृ गतौ सरणः गृधु अभिकांक्षायां गर्द्धनः क्रुध क्रोधे क्रोधनः रुष रोषे रोषणः मडि भूषायां मंडनः भूष अलं
कारे भूषणः ज्यादेरिनिः इनिप्रत्ययः स्यात् इनिप्रत्ययमाह इकार उच्चारणार्थः जि जये जि अभिभवे च इन्नामिति दीर्घः जयी जु गतौ वेगे च प्रजवी दृङ् आदरे दरी क्षि
क्षये क्षि निवासगत्योः क्षयी दादेरुः रुप्रत्ययः स्यात् रु प्रत्ययमाह डुदाञ् दाने दो अवखंडने देङ् पालने त्रयाणामेषां ग्रहणं दारुः न तु दाण दाप इत्यस्य ग्रहणं डुधाञ् धारुः रामः
णादौ धारुः षिञ् बंधने सेरुः सघस्यदः क्मरः क्मरप्रत्ययः स्यात् क्मरप्रत्ययमाह कित्वाद्गुणो न सृ गतौ सृमरः घस्लृ अदने घस्मरः अद भक्षणे अद्मरः भंज भास मिदो घुरः ९६

भिक्षुः आशंसुः कर्तुमिच्छति चिकीर्षतीति सन्प्रत्यये द्वित्वाद्यः सेड् नीत्वं से दीर्घः इति ऋतो दीर्घं ऋत इद्धातोः ग्योर्विर्ह सेड् इति दीर्घः षत्वं चिकीर्षेति जातं यत इत्यल्लोपः चिकी
र्षुः लषकांतौ उकञ् लाषुकः पत्लृ पतने पातुकः पद गतौ पादुकः ष्ठा गतिनिवृत्तौ आतो युगिति युक् स्थायुकः भूसत्तायां भावुकः वृषु सेचने उपधायाल्लघोरिति गुणः वर्षु
कः हन हिंसागत्योः हनो घदिति घत् घातुकः कमु कांतौ कामुकः गम्लृ गतौ गामुकः शॄ हिंसायां शारुकः शॄवंद्योरारुः शॄ हिंसायां वदि अभिवादनस्तुत्योः आभ्या
मारुः आरुप्रत्ययमाह शरारुः वंदारुः शरारु घातुको हिंस्रो वंदारुरभिवादक इत्यमरः स्पृहि गृहि पति दयि निद्रा तन्द्रा श्रद्धा शीङ्भ्य आलुः आलुप्रत्ययमा
हस्पृह ईप्सायां ग्रह ग्रहणे पत गतौ एते त्रयश्चुरादावदंताः अल्लोपस्य स्थानिवत्त्वान्नोपधाया गुणवृद्धी जेरिति त्रिलोपो न नत्विङामं ते ति निषेधात् जेर्गुणे कृते स्पृह

भिक्षुः शंसि वाक्यप्रबन्धे इदितो नुम् आशंसुः चिकीर्षुः लषकान्तौ लाषुकः पत्लृ पतने पातुकः आतो युक् स्थायुकः भावुकः वृषु सेचने वर्षुकः
घातुकः कामुकः शॄ वंद्योरारु शॄ हिंसायाम् शरारुः वदि वन्दारुः स्पृहि गृहि पति दयि निद्रा तन्द्रा श्रद्धा शीङ्भ्य आलुः स्पृहयालुः ग्रह ग्रह
णे चुरादिः गृहयालुः पतयालुः दय दाने दयालुः द्रा कुत्सायाम् निद्रालुः तदो नान्तत्वम् तन्द्रालुः श्रद्धालुः शीङ् शयालुः शमादिभ्यो घि
नुण् शमु उपशमे शमी तमी दमी श्रमी भ्रमी क्षमी क्लमी श्रमी प्रमादी च ञ्णः कगौ घिति चकार जकारयोः ककार गकारौ घिति संप्रयुक्ती योगी ॥

यालुः गृहयालुः पतयालुः दय दाने दयालुः द्रा कुत्सायां नि पूर्वः आतो न पीत्यालोपः निद्रालुः तत्पूर्वो द्रातत् शब्दस्य समाजेन नत्वं निपात्य नेतंद्रालुः श्रत् पूर्वो डुधा
ञ् धारणादौ धेट् पाने यं तु न गृह्यते श्रत् पूर्वस्य धेट् प्रयोगाभावात् शीङ् स्वप्ने शयालुः कथं तर्हि कृपालुः स्पृहालुरिति कृपां स्पृहां च लातीति विग्रहे मृगय्वादित्वात् कुः
शमादिभ्यो घिनुण् शमु तमु दमु श्रमु भ्रमु क्षमु क्लमु मदी शमादयोऽष्टौ घिनुण् प्रत्ययमाह उकार उच्चारणार्थः घित्वाच्च जोरिति कगौ णित्त्वाद् वृद्धिः शाम्यती
त्येवंशीलः शांतः नोदात्तोपदेशस्येति न वृद्धिः इनामिति दीर्घः शमी तमी दमी श्रमी भ्रमी क्षमी क्लमी प्रपूर्वस्य मदेर्दीर्घः प्रमादी आदिशब्देनान्येपि ग्राह्याः एचो संपर्कें च जोरिति

[illegible]

तू च जो रिति कगौ भंजो आमर्दने भंगुरः भासदीप्तौ भासुरः ञिमिदा स्नेहने मेदुरः विदिभिदिछिदेः कुरः कुरः प्रत्ययः स्यात् कुरप्रत्ययमाह कित्वाद्गुणो न विद ज्ञाने अस्यैव ग्र-
हणम् ननु विद्लृ लाभे इत्यस्य संप्रदायात् विदुरं भिदिर् विदारणे भिदुरं छिदिर् द्वैधीकरणे छिदुरं कुरः कर्त्तरि भवति तथा च माघः प्रियतमाय वपुर्गुरुमत्सर छिदु-
रयादुरयाचितमंगना इत्यदुरिति छेदः इण्नशजिसर्त्तिभ्यः क्वरप् एभ्यः क्वरप् प्रत्ययः स्यात् क्वरप् प्रत्ययमाह कित्वान्न गुणः टित्वात् ङीप् इति पूपित्वात्तुक् इ-
ण् गतौ इत्वरः इत्वरी स्त्री णश अदर्शने नश्वरः जि जये जित्वरः सृ गतौ सृत्वरः गम्लृ गतौ मलोपो निपात्यते गत्वरः जागर्तेरूकः ऊकप्रत्ययः स्यात् ऊकप्रत्ययमाह जा-
गृ निद्राक्षये जागरूकः यङ ऊकः यजादिभ्यो यङन्तेभ्यः ऊकः स्यात् यजेर्यङि कृते द्वित्वादि आत इति पूर्वस्य दीर्घः ऽतिशयेन यजतीति यायज्यते यायज्यते इति

विदिभिदिच्छिदेः कुरः विदुरम् भिदुरम् छिदुरम् इण्नशजिसर्त्तिभ्यः क्वरप् ह्रस्वस्य पिति तुक् इत्वरः इत्वरी नश्वरः जित्वरः सृत्वरः गमे-
र्मलोपश्च गत्वरः जागर्तेरूकः जागरूकः यङ ऊकः यजजपदंशवदिभ्यो यङन्तेभ्य ऊक शीले लुक् ऊके सति यङो लुक् यायजूकः जञ्ज-
पूकः दंदशूकः वावदूकः भियः क्रुक्रुकल्लुकाः भीरुः भीरुकः भीलुकः नमादेरः नम्रः स्मेरः नञिपूर्वाज्जसेः क्रियासातत्ये अजस्रम् कम्रः हिं-
स्रः दीप्रः विन्दुरिच्छुः इत्येतौ निपात्यौ वेत्ति तच्छीलो विन्दुः इच्छतीति इच्छुः ॥ यायजूकः जपव्यक्तायां वाचि अतिशयेन जपतीति जमजपामिति नुक् जंजप्य-
ते २ इति जंजपूकः दंश दशने अतिशयेन दशतीति नुक् दंदश्यते २ इति दंदशूकः नोलोप इति नलोपः वद व्यक्तायां वाचि अतिशयेन वदतीति वावद्यते २ इति वाव-
दूकः भियः क्रु क्रुकल्लुकाः ञि भी भये अस्मादेते प्रत्ययाः स्युः क्रु क्रुकल्लुकप्रत्ययानाह कित्वान्न गुणः भीरुः भीलुकः भीरुकाः इत्यमरः नमादेरः रप्रत्ययः स्यात् रप्रत्यय-
नै २ माह णम प्रह्वत्वे शब्दे च नम्रः कपि चलने कंप्रः ष्मिङ् ईषद्धसने स्मेरः जसु मोक्षणे नञ्पूर्वः नाङ् इत्यः अजस्रं कमु कान्तौ कम्रः हिसि हिंसायां हिंस्रः दीपी दीप्तौ दीप्रः विंदुरिच्छुः ए-
तौ निपात्यौ वेत्तेर्नुम् इषेश्छत्वं च निपात्यते विद ज्ञाने इत्यस्यैव ग्रहणं नेतरेषां इषु इच्छायां इत्यस्यैव ग्रहणं न तु इष गतौ इष आभीक्ष्ण्ये इत्यनयोः अनवधानान्निपातनाद्वा ॥

सि॰ च॰ त्वपित्विषिधृषेर्नजिङ्॥ एभ्यो नजिङ् प्रत्ययः स्यात् नजिङ् प्रत्ययमाह ङित्वान्न गुणः इकार उच्चारणार्थः त्रिष्वपि शये चो॰ कुरिति जस्य गः स्वप्नक् तृषपिपासायां तृष्ण
कौ॰ उ॰ क् ञिधृषा प्रागल्भ्ये धृष्णक् स्थादेर्वरः एभ्यो वरप्रत्ययः स्यात् वरप्रत्ययमाह ष्ठा गतिनिवृत्तौ स्थावरः ईश ऐश्वर्ये इह वल्योरितीएन ईश्वरः भास दीप्तौ भास्वरः पिसृ गतौ पे
१७ स्वरः कस गतौ कस्वरः आदृतः किर्द्वित्वं च भूते किप्रत्ययमाह कित्वान्न गुणः किप्रत्यये द्वित्वादि पा पाने द्वित्वादि आतो न पीत्यालोपः पपिः डुदाञ् दाने ददिः डुकृञ् करणे च
क्रिः रङ् सम्भक्तौ रङ्त्यः वव्रिः हञ् हरणे आजह्रिः जनी प्रादुर्भावे गमामित्युपधालोपः जज्ञिः णम् प्रह्वत्वे शब्दे च लोपः पचामित्येत्वपूर्वलोपौ नेमिः गम्लृ गतौ गमामित्यु
पधालोपः जग्मिः षह मर्षणे वह प्रापणे चल कम्पने पत्लृ पतने एते यङन्ताः अतिशयेन सहते इति आत इति पूर्वस्यात्वं सासह्यते सासहां चक्रे इति यत इत्यल्लोपः अनपि

त्वपित्विषिधृषेर्नजिङ् स्वप्नक् तृष्णक् धृष्णक् स्थादेर्वरः स्थावरः ईश्वरः भास्वरः पेस्वरः कस्वरः आदृतः किर्द्वित्वं च भूते आदन्ताद्दन्तात्त्वजनि ॥ टी॰ ॥
गमिनमिभ्यो यङन्तेभ्यस्सासहि वावहि चाचलि पापतिभ्यः किप्रत्ययो भूते शीले धातोश्च द्वित्वम् किर्लिङ्वद्वाच्यः रामस्सोममप्यपिर्यज्ञे ददिर्गा
श्चक्रिरद्भुतम् याजकान्ववव्री राजह्रिः पौण्डरीके महाद्विजान् १ जज्ञिः नेमिः जग्मिः सासहिः वावहिः चाचलिः पापतिः अथोणादयः क्वादेरुण्

चहसादिति यल्लोपः सासहिः अतिशयेन वहतीति वावह्यते वावहां चक्रे इति वावहिः अतिशयेन चलतीति चाचल्यते चाचलां चक्रे इति चाचलिः अतिशयेन पततीति
ति पापत्यते पापतां चक्रे इति वं चुलंसु इति प्राप्तस्य नीकोऽभावो निपात्यते पापतिः रामः सोमं पपिर्यज्ञे ददिर्गाश्च क्रिरद्भुतं याजकान् ववव्री राजह्रिः पौंडरीके महाद्वि ॥ उणादि ॥
जान् १ रामो यज्ञे सोमं पपाविति पपिः अकादाविति वर्ज्जनान्न कर्मणि षष्ठी रामो यज्ञे गाः सुरभीः ददाविति ददिः रामो यज्ञे अद्भुतमाश्चर्यं चकारेति चक्रिः रा
मो यज्ञे याजकान् यज्ञकर्तॄन् ववव्रे इति वव्रिः रामः पौण्डरीके नाम्नि यज्ञे महान्तश्च ते द्विजाश्च महाद्विजास्तान् आजहारेति आजह्रिः १ अथोणादयः क्वादेरुण् उ रामः
ण् प्रत्ययः स्यात् उण् प्रत्ययमाह णित्वाद्वृद्ध्यादि डुकृञ् करणे करोतीति कारुः शिल्पी कारकश्च तत्रान्द्ये योगरूढिर्द्वितीये तु योगमात्रमिति विवेकोऽत एवं योगि १७

प्रतिकारकान्वयो भवत्येव तथा च भट्टिः राघवस्य ततः कार्यं कारुर्वानरपुंगवः सर्ववानरसेनानामाऽऽश्वाऽऽगमनमादिशदिति १ विश्वकर्मणि ना कारुस्त्रिषु कारक
शिल्पिनोरिति मेदिनी कारुः शिल्पिनि कारुकेद्वति धरणिः॥ ॐ॥ वा गतिगंधनयोः आतो युगिति युक् वायुः पा पाने पा रक्षणे च पिबत्यनेन तैलादिकमिति पायुः यु
क् गुदं त्वपानं पायुर्नैत्यमरः पाति रक्षतीति विग्रहे रक्षकोऽपि पायुः जि अभिभवे जयत्यभिभवति रोगानिति जायुः औषधं भेषजौषधभैषज्यान्यगदो जायु
रित्यमरः पुल्लिंगसाहचर्याज्जायुः पुंसि डुमिञ् प्रक्षेपणे मिनोति प्रक्षिपति देहे ऊष्माणमिति मीनातिमिनोतिदीङामित्यात्वं युक् च मायुः मायुः पित्तं कफः श्लेष्मेत्यमरः
गां वाचं विकृतां मिनोति प्रक्षिपतीति गोमायुः सृगालः स्वद आस्वादने स्वदते रोचते इति स्वादुः साध संसिद्धौ साध्नोति परकार्यमिति साधुः स्वादुसाधू विशेष्य
निघ्नौ अशू व्याप्तौ अश्नुते इत्याशुः आशुर्व्रीहिः पाटलः स्यात् शीघ्रार्थोऽप्ययं तत्र विलंबभावमात्रपरत्वे क्लीवः तद्विशिष्टद्रव्यपरत्वे तु त्रिलिंगः अथ शीघ्रं
वातीति वायुः पायुः जायुर्मिनोतीति मायुः ष्वद आस्वादने स्वादुः साधुः आशुः दीर्यते इति दारु सानु जनेर्ञुण् जानु चारु चाटु किं शृणातीति
किंशारुः जरामेति जरायुः त्रोरस्थलः तरन्ति वर्णा अनेनेति तालु कृके वचः कश्च कृकेन गलेन वक्तीति कृकवाकुः ॥ त्वरितमित्युक्तम् क्लीवे
शीघ्राद्यसत्त्वे स्यात् त्रिष्वेषां मेयगामि यदित्यमरः दॄ विदारणे दीर्यते इति दारु काष्ठं दार्विन्धनं त्वेधः इत्यमरः षणु दाने सानुः स्नुः प्रस्थः सानुरस्त्रियामित्यमरः जने
र्ञुण् ञुण् प्रत्ययमाह ञकारणकारौ अनुबंधद्वयसामर्थ्यात् जनिवध्योर्नेति वृद्धिनिषेधो न प्रवर्त्तते जन जनने जानु जानुनी चर गतौ चारु रम्यं चट भेदने चाटु चटु
चाटु प्रियं वाक्यमिति हेमचन्द्रः चाटुर्नरि प्रियोक्तिः स्यादिति रत्नमाला तथा च माघः चकार च बहु चाटून् प्रौढयोषिद्वदस्येति माघे तु क्लीवेऽपि चाटु चाटुकृतकं संभ्रम
मासामिति शॄ हिंसायां किं शारुः किंशारुर्नासस्यशूके विशिखे कंकपक्षिणीति मेदिनी इण् गतौ वृद्धौ कृतायामावादेशे च जरायुः गर्भाशयः त्रोरस्थलः तृ ऋ इति
प्रश्लिष्य द्वयोरपि सवर्णदीर्घे कृते त्रौ तयोस्त्रोः तॄ प्लवनतरणयोः ऋ गतौ अनयोरस्थलः स्यात् उणि वृद्धौ सत्यां तालु ऋ यर्ति अर्यते वा आलुः शाकविशेषो घ
टी च कर्करी आलु गलंतिका इति कृके वचः कश्च कृकशब्दे उपपदे वचेः कं तादेशः स्यात् उणि कृकवाकुः कृकवाकुर्मयूरे च सरटे चरणायुधे इति विश्वः॥

सि॰ कौ॰ उ॰ १८

छि॰ ३ जै॰ ४ कौ॰ ११३

म्बादेरुः उप्रत्ययः स्यात् उप्रत्ययमाह मृङ् प्राणत्यागे म्रियंते स्मिन् भूतानीति मरुः निर्ज्जलदेशः मृञ्मरणे डुभृञ्धारणादौ च भरति बिभर्त्ति वा भरुः भरुः स्वर्णे हरे

पुंसीति मेदिनी भरुर्भर्त्तृकनकयोरिति हैमः शीङ् स्वप्ने शेते इति शयुः अजगरे शयुर्वाहस इत्युभावित्यमरः तॄप्लवनसंतरणयोः तरंति नरकमनेन रोपकादिति

तरुर्वृक्षः चर गत्यादौ चरंति भक्षयंति देवा इममिति चरुः चरुर्भांडे च हव्यान्ने इति घृतपक्वमन्नमित्यर्थः त्सर छद्मगतौ त्सरुः खड्गादिमुष्टिः तनु विस्तारे तनुः

२ कायेत्वचि स्त्री स्यात् त्रिष्वल्पे विरले कृशे इति मेदिनी स्त्रियां मूर्त्तिस्तनुस्तनूरित्यमरः धनधान्ये धनुः स्यात् तनुस्तनुषा सार्धं धनुषा च धनुर्विदुरिति विश्वः उका

रांते स्त्री हर्षः प्रवृद्ध वंशजनितो पि गुणस्य स्थानतां मनुभवन्नपि शार्ङ्ग शिरपुरे णमृजुमाप्तु सपक्षं सायकं धनुरिवाजनि वक्रः १ धनुः पुमान् प्रियालाद्रौ राशिभे

दे शरासने इति सांतेमेदिनी अथास्त्रियां धनुश्चापावित्यमरः डुमिञ् प्रक्षेपणे मीनाति मिनोतीत्यात्वं तु नेह बाहुलकात् मयुः तुरंगवदनो मयुरित्यमरः मयुः

म्बादेरुः मरुः शयुः तरुः चरुः त्सरु छद्मगतौ त्सरुः तनुः धनुः मयुः कटुः वटुः अणुः शरणातीति शरुः खरुः त्रपुः असवः वसुः हनुः वन्धुः मनुः

बिन्दुः स्यन्देस्सम्प्रसारणं च सिन्धुः ॥ तुरंगवदने मृङोपि मयुरिष्यते इति विश्वः टुमस्जो शुद्धौ मज्जति पापी ये इति न्यंक्वादित्वात् कुः कवेज वा इति सस्य

दः मद्गुः मद्गुः पानीयकाकिके तिरभसः अण शब्दे अणुः व्रीहिभेदस्त्वणुं पुमान् स्मि तिलवल्लेशकणाणवइत्यमरः कटे वर्षादौ कटतिरसनामिति कटुः कटुः स्त्री क

टुरोहिण्यां लताराजिकयोरपि नपुंसकमकार्ये स्यात् पुल्लिंगो रसमात्रके त्रिषु तद्वत्सुगंध्योश्च मत्सरेपि स्वरेपि चेति मेदिनी वट वेष्टने वटतीति वटुः वटुर्द्विजसुतः

श्च तद्वति संसारावर्त्तः शृ हिंसायां शरुः शरुः कोपे शरे वज्रे इति हैमः खट शब्दोपतापयोः खरुः शतकोटिः खरुः शंब इत्यमरः त्रपूष् लज्जायां अग्निं दृष्ट्वा त्रप

ते लज्जत इति त्रपुः रंगसीसकयोस्त्रपुरिति मेदिनी असु क्षेपणे अस्यंति क्षिपंति शरीरमिति असवः पुंसि भूम्न्यसवः प्राणा इत्यमरः वस निवासे वसुः वसुर्देहे ग्नौ

योक्त्रे ऽशौ वसु तोये धने मणौ हन हिंसागत्योः हनुः हनुः पुमान् परोगंडादिति वररुचिकोशः स्त्रीलिंगे प्ययं हनुर्हट्टविलासिन्यां नृत्यारंभे गदे स्त्रियां द्वयोः कपोला

विधुं वध्ने

मद्गु छि॰ २१ मद्गु

नुच बंधबंधने स्नेहे न वा भातीति बंधुः बंधुर्बंधूकपुष्पे स्यात् बंधुर्भ्रातरि बांधवे इति विश्वः मनु ज्ञाने मनुः आदिराजो मंत्रश्च विदि अवयवे विंदुः स्यंदेः संप्रसारणं धश्च स्यंदू प्र
स्रवणे अस्य यकारस्य संप्रसारणं दस्य धश्च स्यात् उप्रत्यये सिंधुः देशे नदविशेषेऽब्धौ सिंधुर्ना सरिति स्त्रियामित्यमरः ॥ ॥ उन्देरिच्चादेः उन्दी क्लेदने अस्योकारस्य इः स्या
दुप्रत्यये इन्दुः स्कंदेः सलोपश्च स्कंदिर् गतिशोषणयोः अस्य सस्य लोपः स्याद् उप्रत्यये स्कंदति शोषयतीति कंदुः स्त्रीवेंवरीषं भ्राष्ट्रो ना कंदुर्ना स्वेदनी स्त्रियामित्यमरः स्कंद
ति जनतीयस्मिन्निति व्युत्पत्त्या भोगस्थानं कंदुरिति केचित् सृजेरसुम् सलोपश्च सृज विसर्गे आगमसकारस्य चुत्वेन शः कृ वेजवादिति जः सृजतीति रज्जुः रज्जुर्वे
ष्ट्यां गुणे बांधिदिति मेदिनी फलेर्गुक् फल [illegible] निष्पत्तौ फल्गुः फल्गुः काकोदुंबरिका भवेत् फल्गुर्निरर्थकमिति हैमः नदीनपाठेः पटिः पटिरादेशः स्यात् पटगतौ अन्तः
पारयतीति पटुः मनेर्धः धोन्तादेशः स्यादुप्रत्यये मन ज्ञाने मन्यत इति मधुः मधुश्चैत्रे च दैत्ये च मद्ये पुष्परसे मधु इति हेमचंद्रः मकरंदस्य मद्यस्य माक्षिकस्यापि वाचः

उन्देरिच्चादेः उन्तीति इन्दुः स्कन्देस्सलोपश्च कन्दुः सृजेरसुम् सलोपश्च रज्जुः फलेर्गुक् च फल्गुः पाटेः पटिश्च पाटयतीति पटुस्समर्थः
मनेर्धश्च मन ज्ञाने मधुः जनेस्तश्च जतुः वलेर्गुक् च वल प्राणने वल्गुः नमेर्नाकिश्च नम्यतेऽनेनेति नाकुः स्यतेः कुस्तवश्च शिशुः याभ्योर्द्वित्वं

कः अर्द्धर्चादिगणे पाठात् पुंनपुंसकयोर्मधु इति शाश्वतः जनेस्तः तांतादेशः स्यात् उप्रत्यये जनी प्रादुर्भावे जायत इति जतु लाक्षा वलेर्गुक् गुगागमः स्यादुप्रत्यये वल
संवरणे दन्त्योष्ठ्यादि वल्गुः २ वल्गुः स्याच्छागले पुंसि सुंदरे चाभिधेयवदिति मेदिनी नमेर्नाकिः णमु प्रह्वत्वे शब्दे च नाकुः वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकमि
३९ सायाम् निपातनात्वत्वं शष्पः शष्पं बालतृणेपिच पुंसिस्यात् प्रतिभाहीनेइतिमेदिनी शष्पं बालतृणं घासइत्यमरः वाधृविलोडने धस्यषत्वं निपातनात् बाष्पः वाष्पोनेत्रजलोष्मणोरितिविश्वः वाष्पमूष्मणि चाश्रुणीनि चरुशब्दे दीर्घत्वं निपातनात् रूपं रूपं स्वभावेसौंदर्येइतिविश्वः श्रृहिंसायांनिपातनादुत्त्वं विहसेदितिदीर्घः शूर्पः प्रस्फोटनं शूर्पमस्त्रीत्यमरः स्तनादेर्नामधातोरित्नुः इत्नु प्रत्ययमाह स्तनगदस्तनशब्दे चुरादिर्ण्यंतोगुणेकृतेअयादेशः स्तनयित्नुः स्तनयित्नुः पुमान् वारिदे

सर्तेरप्ययू सरयूः सरयुः पादेः पः पापम् न्यादेः कित् नीपः सूपः कुः शब्दे कूपः शिल्पादयः शील शिल्पम् शसु शष्पम् वाधृ वाष्पम्
रू रूपम् शृ शूर्पः स्तनादेर्नामधातोरित्नुः स्तनयित्नुः गदयित्नुः दाभाभ्यांनुः दानुः भानुः धेटश्च धेनुः सुवः कित् सूनुः स्थारीभ्यांणुः स्थाणुः॥

पिस्तनितेपिचेतिमेदिनीस्तनयित्नुंपयोवाहेतडूत्तौ मरणेरोगयोरितिविश्वः गदयित्नुः गदयित्नुः पुमान् कामेजल्पाके कामुकेपिचेतिविश्वः दाभाभ्यांनुः नुप्रत्ययमाह डु
दाञ्दाने दानुः दानुर्दातरिविक्रान्तेइतिमेदिनी भादीप्तौ भानुः भानू रश्मिदिवाकरावित्यमरः धेटश्चनुः स्यात् धातोरित्वं च धेट्पाने संध्यक्षराणामित्यात्वे कृते इत्वं त
तोगुणः धेनुः धेनुः स्यान्नववत्सेतिकेत्यमरः सुवः कित् नुकस्यात् कित्वान्नगुणः षूङ् प्राणिप्रसवे सूनुः सूनुः पुत्रेनुजेरवावितिविश्वः अजिवृभ्यांणुः णुप्रत्ययमाह राम॰
अजगतौ अजेर्वीतिवी वेणुः वेणुर्नृपान्तरेवंशेइतिविश्वः वृङ्संभक्तौ वर्णुः नददेशभेदयोः स्थारीभ्यांणुः ष्ठागतिनिवृत्तौ स्थाणुः स्थाणुः कीलेहरेपुमान् अस्त्री ३९
ध्रुवेइतिमेदिनी स्थाणु कीलेस्थिरेहरे इतिविश्वः रीगतिरेषणयोः॥ अजिवृभ्यांणुः वेणुः वर्णुः ६

रेणुः रेणुः स्त्रीपुंसयोर्धूलौ पुल्लिंगः पर्पटे पुनरितिमेदिनी रेणुर्द्वयोः स्त्रियां धूलिरित्यमरः विषेः कितृणुक् प्रत्ययमाह कित्वान्न गुणः विष्लृव्याप्तौ विष्णुः विष्णुर्नाराय
णकृष्ण इत्यमरः कादेः कः कप्रत्ययमाह बाहुलकान्नकस्येत्वं डुकृञ्करणे कर्कः कर्कः कर्कैतनौ वह्नौ शुक्लाश्वे दर्पणे घटे इति विश्वः रादाने राका राकानर्यन्तरे
कन्यां नवजातरजः स्त्रियां संपूर्णेन्दुतिथावितिमेदिनी राकानुसरिदं तरे राकानवरजः कन्या पूर्णेन्दुः पूर्णिमापि चेति विश्वः अर्च पूजायां चोः कुरिति कः अर्कः
अर्कोऽर्कपर्णे स्फटिके रवौ ताम्रे दृहस्य ताविति विश्वः कलगतौ कल्कः कल्कोऽस्त्री घृततैलादिशेषे दंभे विभीतके विट्किट्टयोश्च पापे च त्रिषु पापाशये पुनरितिमे
दिनी कल्कः पापाशये पापे दंभे विट्किट्टयोरपीति विश्वः इण्गतौ एकः एकं संख्यांतरे श्रेष्ठे केवले तरयोस्त्रिष्विति मेदिनी एके मुख्याऽन्यकेवला इति वि
श्वः ञिभीभये भेकः भेको मंडूकमेघयोरिति विश्वः कै शब्दे काकः काकः स्याद्वायसे वृक्षप्रभेदे पीठसर्पिणि शिरोऽवक्षालने मानप्रभेदे द्वीपभेदयोः काका
रेणुः विषेः कितू विष्णुः कादेः कः कर्कः राका अर्कः कल्कः इण एकः भेकः काकः पाकः निहाकः नौसदेर्डिन् निष्कः शकेरुनउन्त २५
उन्तिउनि प्रत्ययाः शकुनः शकुन्तः शकुन्तिः शकुनिः हृश्याभ्यामितः हरितः श्येतः ॥ स्यात्काकनासायां काकोली काकजंघयोः रक्तिकायां मलय्यां
च काकमाच्यां च योषिति काकं सुरतबंधे स्यात् काकानामपि संहताविति मेदिनी मलयूः काकोदुंबरिका पा पाने पाकः पाकः परिणतौ शिशौ केशस्य जरसा शौक्लये स्याल्या
दौ पचने पि चेति मेदिनी ओहाक् त्यागे निहाका निहाका गोधिके समे इत्यमरः नौसदेर्डिन् कड् कड् प्रत्ययमाह डित्वाट्टिलोपः षद्लृविशरणादौ निष्कः निष्कोऽस्त्री हेम्नि ता
म्ले इति विश्वः शकेः उनउंतउंतिउनि प्रत्ययाः उनउंतउंतिउनि प्रत्यया नाह शक्लृ शक्तौ शकुनः शकुंतः शकुंतिः शकुनिः शकुंति पक्षि शकुनि शकुंत शकुन द्विजा
इत्यमरः शकुनस्तु पुमान् पक्षिमात्र पक्षिविशेषयोः शुभशंसिनि निमित्ते च शकुनं स्यान्नपुंसकमिति मेदिनी शकुंतः कीटभेदे स्यात् भासि पक्षिविहंगयोरितिमेदिनी हृ
श्याभ्यामितः इतप्रत्ययमाह हृञ् हरणे हरितः हरिता स्त्री च दूर्वायां हरित् वर्णयुतेन्यवदिति मेदिनी श्यैङ् गतौ श्येतः शुक्लशुभ्रशुचिश्वेतविशदश्येतपांडुरा इत्य

सि॰चं॰ टी॰ उ॰ ३२ रुहेरश्चलो वा अस्मादितः स्यात् रस्य वा लकारः रुह बीजजन्मनि रोहितः लोहितः रोहितं कुंकुमे रक्ते ऋजुशक्रशरासने पुंसि स्यान्मीनमृगयोर्भेदे रोहितकन्तु मेदृति
मेदिनी लोहितं रक्तगोशीर्षकुंकुमे ... चंदने पुमान् नदान्तरे भौमे वर्णे च त्रिषु तद्वतीति मेदिनी श्वादेराप्यः आप्यप्रत्ययमाह श्रु श्रवणे श्रवाप्यः श्रवाप्यो यज्ञप
शुः स्पृह ईप्सायां चुरादिरदंतः स्पृहयाप्यः वृञ एण्यः एण्यप्रत्ययमाह वृञ् वरणे वरेण्यः श्रेष्ठः अर्तेरन्यः अन्यप्रत्ययमाह ऋ गतौ अरण्यं अटव्यरण्यं वि
पिनमित्यमरः पृषु सेचने षस्य जः अन्यश्च स्यात् पर्जन्यः पर्जन्यो मेघशब्दे ध्वनदंबुदशक्रयोरिति मेदिनी वदेरान्यः आन्यप्रत्ययमाह वद व्यक्तायां वाचि व
दान्यः वदान्यस्त्यागिवाग्मिनोरित्यजयकोशः अमादेरत्रः अत्रप्रत्ययमाह अम गत्यादौ अमत्रं भाजनं नक्ष गतौ नक्षत्रं नञः प्रकृतिभावे नक्षत्रमिति साधित
तत्तु चिंत्यं तत्रं पत्लृ पतने पतत्रं तनूरुहं गंड सेचने गडेरादेश्च कः कडत्रं डलयोरेकत्वस्मरणात् कलत्रं कलत्रं श्रोणिभार्ययोरित्यमरः वृञ् वरणे वरत्रा नध्री

रुहेः रश्च लो वा रोहितः लोहितम् श्वादेराप्यः श्रवाप्यः स्पृहपाप्यः वृञ एन्यः वरेण्यः अर्तेरन्यः अरण्यम् पृषु सेचने पृषेश्च षस्य
जः पर्जन्यः वदेरान्यः वदान्यः अमादेरत्रः अमत्रम् नक्षत्रम् पतत्रम् कलत्रम् वरत्रा भ्रादेरतः भरतः पर्वपूर्तौ पर्वतः पृषिरञ्जि
भ्यां कित् पृषतः रजतम् शपादेरथः शपथः ॥ वध्री वरत्रा चेत्यमरः चर्ममयी रज्जुरित्यर्थः भ्रादेरतः अतप्रत्ययमाह भृञ् भरणे भरतः भरतः शबरे नटे क्षे
त्रे रामानुजे त्वाखे दौष्यंतौ तद्वभावान्वजे तंतुवाये इति हेमचंद्रः भरतो नानाट्यशास्त्रे शबरे च मुनौ नटे रामानुजे च दौष्यंतावितिमेदिनी पर्व पूरणे पर्वतः पर्वतः पादपपुं
सि शाकमत्स्यप्रभेदयोः देवमुन्यंतरे शैले इति मेदिनी पृषिरंजिभ्यां कित् कित् प्रत्ययमाह कित्वान्न गुणः पृषु सेचने पृषतः पृषन्मृगे पुमान् बिंदौ नद्वयोः पृषतोपि रामः
ना अनयोस्त्रिषु श्वेतबिंदुयुक्तेप्युभाविमाविति मेदिनी रंज रागे नो लोप इति नलोपः रजतं रजतं त्रिषु शुक्ले स्यात् क्लीवे हारे च दुर्वर्णे इति मेदिनी शपादेरथः अथ ३२
प्रत्ययमाह शप आक्रोशे शपथः शमु दमु उपशमे ० ॥

शमथः दमथः शमथः शांतिमंत्रिणोरिति मेदिनी दमथस्तु पुमान् दंडे दमे च परिकीर्तित इति मेदिनी शमथस्तु शमः शांतिर्दांतिस्तु दमथो दम इत्यमरः वस निवासे आवस
थो गृहं संवसथो ग्रामः रभादेरसः असप्रत्ययमाह रभ राभस्ये रभसः रभसो वेगहर्षयोः वेञ आत्वाभावस्तुट् च वेञ् तंतुसंताने अस्मात् सप्रत्यये परे आत्वाभावः प्रत्ययस्य
तुडागमश्च स्यात् वेतसः दिवः कित् कसप्रत्ययमाह कित्वान्न गुणः दिवु क्रीडादौ दिवसः वा तु क्लीवे दिवसवासरावित्यमरः कादेरभः अभप्रत्ययमाह कृ विक्षेपे करभः
करभो मणिबंधादिकनिष्ठांतोष्ट्रतनुतेष्विति मेदिनी मणिबंधादाकनिष्ठं करस्य करभो बहिरित्यमरः शॄ हिंसायां शरभः शरभस्तु पशौ [illegible] करभे वानरभिदीति मेदिनी
शल गतौ शलभः समौ पतंगशलभावित्यमरः कल गतौ कलभः कलभः करिपोतके गर्द शब्दे गर्दभः गर्दभं श्वेतकुमुदे गर्दभो गंधभिद्यपि रासभे गर्दभी [illegible] क्षुद्रजंतुरोगग्र

शमथः दमथः वस आवसथः सन्वसथः रभादेरसः रभसः वेञ आत्वाभावस्तुट् च वेतसः दिवेः कित् दिवुदिवसः कादेरभः कृकरभः
शृ शरभः शल गतौ शलभः कल गतौ कलभः गर्द कुत्सिते शब्दे गर्दभः ऋषिवृषिभ्यां कित् ऋषभः वृषभः रासृ शब्दे रासभः वल वल्ल स
म्वरणे वल्लभः विशादेरन्तः वेशन्तः वसन्तः जयन्तः ॥ मेदयोरिति मेदिनी ऋषिवृषिभ्यां कित् कभप्रत्ययमाह कित्वान्न गुणः ऋषी गतौ ऋषभः स्यात्

दिजिने वृषभे भेषजे स्वरे कर्णरंध्रे कोलपुच्छे श्रेष्ठे चाप्युत्तरस्थितः ऋषभी शूकशिंब्यां स्यात् पुरुषाकारयोषिति विधवाशिरालायामिति हेमचंद्रः ऋषभस्त्वौषधांतरे स्व
रवृषभयोः कर्णरंध्रे गर्दभपुच्छयोः उत्तरस्थः स्मृतः श्रेष्ठे स्त्री नराकारयोषिति शूकशिंब्यां शिरालायां विधवायां कचिन्मतेति मेदिनी वृषु सेचने वृषभः वृषभः श्रेष्ठवृ
षयोः रासवल्लिभ्यां च कभः स्यात् रासृ शब्दे रासभः वल्ल संवरणे वल्लभः वल्लभो दयितेऽध्यक्षे सल्लक्षणतुरंगमे इति मेदिनी विशादेरंतः अंतप्रत्ययमाह विश प्रवे
शने वेशंतः वेशंतः पल्वलं चाल्पसर इत्यमरः वस निवासे वसंतः ऋतुः जि जये जयंतः जयंतः पाकशासनिरित्यमरः ॥ ॥ ॥

पत्रा

सि॰ चं॰

ऊ॰ ३

३३

हंतेर्हिं मुट् च हनदिंसागत्योः अस्य हिरादेशोंतप्रत्ययश्च प्रत्ययस्य मुडागमश्चस्यात् हेमंतः वाहुलकादन्यस्मोप्यंतः अर्हपूजायांअर्हंतः अर्हंतःक्षपणकोजिनः इतिविक्र
मादित्यकोशः अर्त्यादेररः अरप्रत्ययमाह ऋगतौअररम् अररंस्थिद कपाटयोरितिमेदिनीकपाटमररंतुल्येइत्यमरः भ्रमुअनवस्थानेभ्रमरभ्रमरः कामुकेभृंगेइतिमे
दिनीचमुअदनेचमरः चमरंचामरेस्त्रीतुमंजरीमृगभेदयोरितिमेदिनीदिवुक्रीडादौअंतः देवयतीतिदेवरः पत्युः कनिष्ठभ्राता वसनिवासेअंतः वासयतीतिवासरोदिवसः
कुवः करः करप्रत्ययमाहकित्वान्नगुणः कुशब्देकुररः उतक्रोशकुररौसमावित्यमरः अंग्यादेरारः आरप्रत्ययमाह अगिगतौअंगारः अंगारंमुल्मुकेनस्त्रीपुल्लिंगः
तुमदीसुतेइतिमेदिनीमदिस्तुत्यादौमंदारः वाहुलकादारुप्रत्ययोपिमंदारुः पारिभद्रेतुमंदारुर्मंदारःपारिजातकेइतिशब्दार्णवः मंदारः स्यात्सुरद्रुमेपारिभद्रेऽर्क
पर्णेचेतिविश्वः गडेः कडः गडिवदनैकदेशेगडसेचनेवाअस्यकडादेशः आरप्रत्ययश्चस्यात्कडारः कडारः कपिलः पिंगइत्यमरः कडारः कपिलेदासेइतिमेदिनीअंं

हंतेर्हिं मुट् च हेमन्तः अर्त्यादेररः अररम् भ्रमरः चमरः देवरः वासशब्दे वासरः कुवः अंग्यादेरारः अंगारः मन्दारः गडेः कडः गडस्या
सेचने कडारः शृङ्गारादयः शृंगारः भृंगारः मञ्जूष माज्जीरः कमुकुमारः तुषारः कासारः ॥ गारादयः आरप्रत्ययांतानिपात्यंतेशृहिंसायांनुम् गुकू ह्रस्व
श्चनिपात्यते शृंगारः शृंगारः सुरतेनाट्यरसेचगजमंडनेनपुंसकंलवंगेपिनागसंभवेचूर्णयोरितिमेदिनीभृञ्भरणेनुम्गुक्ह्रस्वश्चनिपात्यतेभृंगारः भृंगारः कनकालु
काभृंगारीकिल्लिकायांस्यात् कनकालुःपुनःपुमान् इतिच मञ्जूमुद्रोमजेर्दीर्घिरितिदीर्घिः माज्जीरः ओतुर्विडालोमार्ज्जारइत्यमरः मार्ज्जारओतौखट्वांगेइतिमेदि
नीकमुकांतौउपधायाउत्वंगुणाभावश्चनिपातनात् कुमारः कुमारः स्यात्सुकेस्कंदेसुवराजेऽश्ववारकेवरुणद्रोनानद्योर्जात्यकांचनेकुमारीशैलतनयानव
मल्लार्नदीभिदिसहाऽपराजिताकन्याजंवूद्वीपेषुचस्त्रियामितिमेदिनीतुषतुष्टौतुषारः तुषारस्तुहिनंहिममित्यमरः कासशब्दकुत्सायांकासारः सरसीसरइत्यमरः

वनोजगामल्लिका

वालके

कल ॥१॥
कुररः

राम:
३३

सि॰

यो॰ शृंगार

अपत्यसाद्दिरस्यसाधुः ॥

सर्तेरपः षुक् च सृ गतौ अस्मादपप्रत्ययः स्यात् धातोः षुगागमश्च अपप्रत्ययमाह सर्षपः विटपादयः कप्रत्ययान्तानि पात्यन्ते कित्त्वान्न गुणः विटशब्दे विटपः विटपो
नस्त्रियां स्तंबे शाखाविस्तारपल्लवे विटाधिपे नेति मेदिनी विश प्रवेशने विशतेः प्रत्ययस्य तुडागमो निपात्यते छशषेति षत्वं ष्टुत्वं विष्टपं विष्टपं भुवनं जगदित्यमरः क
णशब्दे वस्योत्वं निपातनात् कुणपं कुणपः पूतिगंधे शवे चेति मेदिनी कुणपः शवमस्त्रियामित्यमरः वल संवरणे वस्योत्वं निपातनात् उलपं उलपो न स्त्री गुल्मिन्यामु
लपो नाम तृणान्तरे इति मेदिनी वृतादेश्चिकः तिकप्रत्ययमाह वृतु वर्तने वर्तिका कृतादेः कित् कृती छेदने इत्यादिभ्यः तिकक् स्यात् कित्त्वान्न गुणः कृत्तिका भिदिर्
भिदृ विदारणे भित्तिका भित्तिः लतु सौत्रो धातुः लत्तिका गोधा इष्यशिभ्यां तकः तकप्रत्ययमाह इषु इच्छायां षुत्वं इष्टका अशू व्याप्तौ छशषेति षत्वं अष्टका वीपतिभ्यां

सर्तेरपः षुक् च सर्षपः विटपादयः विटशब्दे विटपः विष्टपम् कुणपम् वलसंवरणे उलपम् वृतादेश्चिकः वर्तिका कृतः कित् कृत्तिका इष्य
शिभ्यां तकः इष्टका अष्टका वीपतिभ्यां तनः वेतनम् पत्तनम् अर्त्यादेर्भः अर्भः दृभये दर्भः गर्भः इणः कित् इभः असिसंजिभ्यां क्थिन् अ
स्थि सक्थि शुषादेः क्सिः शुक्षिः कुष निष्कर्षे कुक्षिः अशू अक्षिः इषः क्सुः इक्षुः ॥ तनः तनप्रत्ययमाह वी गत्यादौ वेतनं पत्लृ पतने पत्तनं पत्तनं पुट

भेदनमित्यमरः अर्त्यादेर्भः भप्रत्ययमाह ऋ गतौ इयर्तीति अर्भः शिशुः कप्रत्यये अर्भकः दृ विदारणे दर्भः गॄ निगरणे गर्भः गर्भो भ्रूणेऽर्भके कुक्षौ संधौ पनसकंटके इ
ति मेदिनी इणः कित् भक् स्यात् कित्त्वान्न गुणः इण् गतौ इभः इभः स्तंबेरमः पद्मीत्यमरः असिसंजिभ्यां क्थिन् क्थिन्प्रत्ययमाह कित्त्वान्न गुणः असु क्षेपणे अस्थि की
कसं कुल्यमस्थि चेत्यमरः षंज संगे चोः कुरिति जस्य गः खसे च पा इति कः नोलोप इति नलोपः सक्थि सक्थि क्लीबे पुमानूरुरित्यमरः शुषादेः क्सिः क्सिप्रत्ययमाह
कित्त्वान्न गुणः शुष शोषणे षढोः कः सि इति कः षत्वं शुक्षिः वातः कुष दाहे कुक्षिः अशू व्याप्तौ छशषेति षत्वे कत्वं च अक्षि नयनं इषः क्सुः क्सुप्रत्ययमाह कित्त्वान्न गुणः इ
षु इच्छायां कत्वे इक्षुः रसाल इक्षुरित्यमरः ॥ ६ ॥

सि॰च॰ अवितृस्तृतंत्रिभ्यईः ईप्रत्ययमाह अवरक्षणादौ अवीः अवीर्नारीरजस्वला तृ प्लवनतरणयोः तरीः स्त्रियांनौस्तरणीस्तरिरित्यमरः स्तृञ् आच्छादने स्तरीर्धूमः तं
कु॰उ॰ त्रिकुटुंबधारणेचुरादिः तंत्रयतीतिणेरितिणिलोपः तंत्रीवीणादेर्गुणः लक्षेर्मुट्च लक्षदर्शनांकनयोः चुरादिः अस्मादीप्रत्ययः स्यात्प्रत्यय
३४ स्यमुडागमश्च णेरितिणिलोपः लक्ष्मीः लक्ष्मीसंपत्तिशोभयोः ऋद्ध्यौषधौचपद्मायामितिमेदिनी दीर्घादपिकृदिकारादितिपाक्षिकई पुंकेश्चिदिष्यतेअतएववातप्र
मीश्रीलक्ष्मीत्यादिशब्दाः पक्षेईवंताअपिआशीरास्यहिदंष्ट्रायांलक्ष्मीर्लक्ष्मीहरिप्रियाइतिद्विरूपकोशः॥ ॥ इतिउणादौतृतीयःपादःसंपूर्णतामगमत्॥ ॥
३ वातप्रम्यादयः कोप्रत्ययांतानिपात्यंतेकस्येत्सज्ञामाङ्‌माने आतोनपीत्यालोपः वातंप्रमिमीते इतिवातप्रमीः वातप्रमीर्वातमृगइत्यमरः अयंस्त्रीपुंसयोःया
प्रापणेययीरश्वः पापानेपपीः निपातनादुभयत्रद्वित्वंपपीः स्यात्सोमसूर्ययोरितिविश्वः रत्यादयः निपात्यंतेऋअंजुमदीअतअगिकुपुकृशिभ्योष्टभ्यः कत्निआ

अवितृस्तृतंत्रिभ्यईः अवीः तरीः स्तरीर्धूमः तंत्रीः लक्षेरीमुट्च लक्ष्मीः इतितृतीयःपादः वातप्रम्यादयः वातप्रमीः यांत्यनेनेतिययीःपार
क्षणेपपीः रत्यादयः अरत्निः अञ्जू अञ्जलिः मदीमत्स्यः अतेरतिथिः अगिअंगुलिः कु[illegible]रः कौतिः कवचः युयवासः कृशकृशानुःअः
लिर्ष्वादिवलिश्चचआसआनुकप्रत्ययाः यथासंख्यमष्टौभवंति ऋगतौकत्निः कित्वान्नगुणः रत्वंरत्निः बद्धमुष्टिः करोरत्निःसोऽरत्निः ॥करःशर्करा ॥
प्रसृतांगुलिः अरत्निरत्रनञ्समासःप्रसृतांगुलिर्योहस्तःसोऽरत्निरित्यर्थः अंजूव्यक्तादौअलिः अंजलिः अंजलिस्तुपुमान्हस्तसंपुटेकुडवेपिचेतिमेदिनीमदी
हर्षेस्यःमत्स्यः मत्स्योमीनेचपुंभूम्निदेशेइतिमेदिनीअतसाततत्यगमनेइथिः अतिथिः अतिथिः कुशपुत्रेस्यात्पुमानागंतुकेत्रिष्वितिमेदिनी अगिगतौउलिःअं
गुलिः अंगुलिः करशाखायांकर्णिकायांगजस्यचेतिहेमः कुशब्देअचः कवचः कवचोगर्दभांडेचसन्नाहे पर्पटेपिचेतिमेदिनीयुमिश्रणेआसः यवासःयासोयवासो
दुःस्पर्शइत्यमरः कृशतनूकरणेआनुकृकृशानुः कृशानुः पावकोनलइत्यमरःअःकरः करप्रत्ययमाह ककारस्यनेत्वंवाहुलकात्शृहिंसायांशर्कराशर्कराखंड

रामः
३४

अमुदे विपचः

पुषः कित् करन् प्रत्ययमाह पुष पुष्टौ पुष्करं पुष्करं खे वुपद्मयोः सूर्यवक्रे खड्ग फले हस्ति हस्ताग्र कांडयोः कुष्ठौषधौ द्वीपतीर्थभेदयोश्च नपुंसकं उरंगनागविहं
गनृत्यभेदेषु चाम्बु इति मेदिनी गमेरिनिः इकार उच्चारणार्थः इन् प्रत्ययमाह गम्लृ गतौ इनामिति दीर्घः गमी आङ्पूर्वाद् गमेरिनि प्रत्ययस्तु णित् णित्वाद्वृद्धिः आगमिष्यती
ति आगामी भूसत्तायामस्मादपि इनिः स च णित् स्यात् भविष्यतीति भावी परमे स्थः कित् परमशब्दे उपपदे तिष्ठतेरिनिः कित् स्यात् कित्वादातो लोप इत्यालोपः परमेष्ठी परमेष्ठी
पितामहः इत्यमरः मथन्यात्थ्यस्तु कुमंथ इनिः कित् मंथ विलोडने अस्मादिनिः कित् नो लोप इति नलोपः इतोत्सर्वनामस्थाने इत्यत्वं आसौ इति टेरात्वे यो नुट् मंथाः मंथामंथानं दंडे च व
ज्रे चा... पतेः स्थश्च पत्लृ गतौ अस्मादिनिः स्यात् तकारस्य थश्च पंथाः पथे गतावित्यस्मात्पचाद्यप्रत्यये अकारांतोप्यस्ति वाटः पथश्च मार्गश्चेति सुभूतिचंद्रः ऋभवो दे
वाः ऋ यंत्यः क्षिन्निति विग्रहे बाहुलकात् ड प्रत्यये ऋभुक्षः ऋभुक्षः स्वर्गवज्रयोरिति विश्वः ततो मत्वर्थीयेनिः ऋभुक्षिन्निति नांतं प्रातिपदिकं अत्वे आत्वे च ऋभुक्षाः इंद्रः

पुषः कित् पुष्करः गमेरिनिर्भविष्यति गमिष्यतीति गामी परमे स्थः कित् परमेष्ठी मन्थ इनिः कित् मन्था मन्थानौ पतेस्थश्च पन्थाः पन्था
नौ बलाकादयः बलाका पताका खजमन्थे खजाकः पिनाकः तड आघाते तडाकः दूषरीकः दूषीका ॥ बलाकादयं आकप्रत्ययान्ता निपात्यन्ते

बल प्राणने बलाका ब लाका वकपंक्तिः स्याद्बलाका बिसकण्ठिका बलाका कामुकी प्रोक्ता बलाका च बको मत इति विश्वः पत्लृ पतने पताका वैजयन्त्यां च सौभाग्ये के ध्वजे
पिच्छे इति विश्वः पताका वैजयन्त्यां च सौभाग्ये नाटकांशयोरिति मेदिनी खज मन्थे खजाकः पक्षी पारक्षेणे पातेरित्वं नुम् निपात्यते पिनाकः क्लीबपुंसोः पिनाकः स्यात् शूल
शंकरधन्वनोरित्यमरः पिनाकोऽस्त्री रुद्रचापे पांसुवर्षत्रिशूलयोरिति मेदिनी पिष्लृ संचूर्णने षस्य णत्वं धातोर्यगागमश्च निपात्यते पिण्याकः पिण्याकोऽस्त्री तिलकल्के
हिंगुबाह्लीकं सिद्धके इति मेदिनी तड आघाते तडाकः दूषरीकः ईकप्रत्ययमाह दुष वैकृत्ये ण्यन्तः दुषेर्णौ विति दीर्घः णेरिति णिलोपः दूषीका नेत्रयोर्मलमित्य
मरः किंच अकृते पि ईक प्रत्यये दूषयतेर्धातोरिरितीति प्रत्यये दूषिः कृदिकारादिति वेपि दूषी उभाभ्यामपि स्वार्थे कप्रत्यये ह्रस्वो वेति पाक्षिके ह्रस्वे च कृते दूषिका दू

चित्रकालेपकरटम्

सि· चं· षीका च सिद्धाति पिचंडो दूषिकादूषीपि चाटं चट्टेर्मलमिति विक्रमादित्यकोशः दूषिकात् लिकायां च मले स्यादोच नस्य चेति मेदिनी ॥ ॥ अनिरूषिभ्यां कित् कीकप्रत्ययः

कू उ स्यात् कित्वान्न गुणः अन प्राणने अनीकं अनीकोऽस्त्री रणे सैन्ये इति मेदिनी हृष तुष्टौ हृषीकं हृषीकं विषयेंद्रियमित्यमरः अलीकादयः कीकप्रत्ययांता निपात्यंते अलभू

३५ षणादौ अलीकं अलीकं त्वप्रिये विस्यात् दिवि सत्ये नपुंसकमिति मेदिनी अलीकमप्रिये लाभे वितथे इति हेमचंद्रः विपूर्वात् व्यलीकं व्यलीकमप्रियाकार्यवैलक्ष्येषु

पिपीडने नानागरे इति मेदिनी वल संवरणे वल्लीकं वलीकनीध्रे पटलप्रांते इत्यमरः वलतेर्निपातनात् मुमागमे कृते वल्मीकं वामलूरश्च नाकुश्च वल्मीकं पुंनपुं

सकमित्यमरः पुण शुभे कर्मणि धातोः नुमागमो णस्य डश्च प्रत्ययस्य रुडागमश्च निपातनात् पुंडरीकं पुंडरीकं सिताम्भोजे सितच्छत्रे च भेषजे पुंसि व्याघ्रे च दिङ्नाग

कोशकारांतरे पि चेति मेदिनी ईषगतौ निपातनात् ह्रस्वः इषीका शलाकाका कादेरीषः ईषप्रत्ययमाह कृविक्षेपे करीषः करीषं गोमयं शुष्कमित्यमरः तृ प्लवन

अनिहृषिभ्यां किच्च अनीकं हृषीकम् अलीकादयः अलभूषणादौ अलीकम् वल्मीकम् पुणाकर्मणि शुभे पुण्डरीकम् ईषीका इषीका

कादेरीषः करीषम् तृ तरीषः आदेः कीषः शृ शिरीषः पृ पुरीषम् अजेर्ज्रीजः ऋजीषम् अविशब्दे अम्बरीषो निपात्यः अम्बरीषम् कादेरीरः क

॥ शरीरम् ॥

तरतेर्वा तरीषः तरीषाश्चादेः कीषः शृहिंसायां अस्मात् इति शिरीषो वृक्षः पृ पालनपूरणयोः पोरुरित्युत्वं पुरीषं गूथं पुरीषं वर्चस्कम

स्त्री विष्ठा विशाप्रियामित्यमरः अर्जेर्ऋजः अर्ज अर्जने अस्मात् कीषः स्यात् धातोर्ऋजादेशश्च ऋजीषं ऋजीषं पिष्टपचनमित्यमरः अविशब्दे निपातनात् ईषप्रत्य

यः प्रत्ययस्य रुडागमश्च अंबरीषः अंबरीषं रणे भ्राष्ट्रे क्लीवं पुंसि नृपांतरे नरकस्य प्रभेदे च किशोरे भास्करेपि च आम्रातके नु [redacted] चेति मेदिनी अंबरीषः पुमान् भ्राष्ट्रमि

त्यापालित [illegible] क्लीवं अंबरीषं भ्राष्ट्रो नेत्यमरः कादेरीरः ईरप्रत्ययमाह कृविक्षेपे करीरः वंशांकुरे करीरोऽस्त्री वृक्षभिद् घटयोः पुमान् करीरी चीरिकायां

चदंतमूले चरंती नामिति मेदिनी शृ हिंसायां शीर्यते इति शरीरं अर्द्धर्चादिः शरीरं वर्ष्म विग्रहमित्यमरः ॥

तापे ॥ ३॥

चीरिति का पते ची रिका किं रामः ३५

नि

गभीराद्यः ईरप्रत्ययांतानि निपात्यंते गम्लृ गतौ अस्य भः पाक्षिको नुम् च निपातनात् गभीरं गंभीरं निम्नं गभीरं गंभीरमित्यमरः वश कांतौ निपातात्कीरप्रत्ययः ग्रहामिति सं
प्रसारणं उशीरं मूले ऽस्योशीरमस्त्रियां अभयं नलदं सेव्यमित्यमरः घस्लृ अदने कीरप्रत्ययो निपातनात् गमामित्युपधालोपे कत्वं षत्वं क्षीरं क्षीरं दुग्धे च नीरे चेति वि
श्वः शीङोधुक् लकु वल्ल वलज्जू वालपालाः शीङ् स्वप्ने अस्मात् षट् प्रत्यया भवंति शेरते ऽनेनेति शीधुः इक्षुरसोद्भवो मद्यविशेषः मैरेयमासवः शीधुरित्यमरः लकु शीलं शीलं स्व
भावे सद्वृत्ते इति मेदिनी वलू शैवलं वलज्जू शैवलं जलनील्यां तु शैवालं शैवल इत्यमरः शैवलं पद्मकाष्ठे स्यात् शैवाले तु पुमानयमिति मेदिनी वाले शैवालं शेपालं
शेपालः शैवलः स्त्रीनु स्त्री शेपाली जलनीलिकेति शब्दार्णवः उलूकादयः ऊक प्रत्ययांतानि निपात्यंते वल संवरणे सम्प्रसारणं निपातनात् उलूकः उलूकः पुंसि काका
रिंद्रे भारतयोधिनीति मेदिनी शम उपशमे धातोर्बुगागमो निपातनात् शंबूकः शंबूको गजकुंभांते घोषे च शूद्रतापसे इति मेदिनी बाहुलकादूक प्रत्ययोपि जं

गभीराद्यः गम्लृ गभीरः गम्भीरः वश उशीरम् घस क्षीरम् शीङोधुकू लकु वल्ल वलज्जू वालपालाः शीधुः शीलम् शैवलः शैवालम् शेपा
लम् उलूकादयः उलूकः शमु शम्बूकः शल शल्लूकः मुडि भूषायाम् मण्डूकः नियो मिः नेमिः अर्तेरूर्च ऊर्मिः भुवः कित् भूमिः

बूकं जंबुकं प्रोक्तं शंबूकमपि शंबुकमिति द्विरूपकोशः शंबूका जलशुक्तयः इत्यमरः शल गतौ निपातनाद्वृद्धिः शाल्लूकं सौगंधिकं तु कल्हारमित्यादावुपक्रम्य शाल्लूक
मेषां कंदः स्यादिति अमरः एषां सौगंधिकादीनां कुमुदकैरवाणां कंदो मूलं शाल्लूकमित्यर्थः मडि भूषायां मंडते वर्षासमयमिति मंडूकः भेकः नियो मिः मिप्रत्ययमा
हसीत्यत्र आपरणे नयति चक्रमिति नेमिः नेमिर्ना तिनिशे कूपत्रिकाचक्रांतयोः स्त्रियामिति मेदिनी अर्तेरूर्च मिप्रत्ययः स्यात् धातोरूरादेशश्च ऋ गतौ ऊर्मिः ऊ
र्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभंगयोः वस्त्रसंकोचरेखायां वेदनापीडयोरपीति मेदिनी भुवः कित् भूमिः कु स्यात् कित्वान्न गुणः भूः सत्तायां भवंति भूतान्यस्यामिति भू
मिः भूमिर्वसुधरायां स्यात् स्थानमात्रेपि च स्त्रियामिति मेदिनी ॥

सि॰च॰ अश्नोतेः रश्मिश्च अशूङ् व्याप्तावस्मात् मिः स्यात् धातो रश्मादेशश्च रश्मिः रश्मिः पुमान् दीधितौ स्यात् पक्ष्मप्रग्रहयोरपीति मेदिनी स्वादेर्निः कित् सूगतौ सृणिः अं
कौ॰उ॰ कुशो स्त्र्यां सृणिः स्त्रियामित्यमरः सृणिः स्याद् अंकुशे पुमानिति दृषु सेचने दृश्निः दृश्निस्तु यादवे मेषे दृश्निः पाषंड चंडयोरिति विश्वः दृश्निः स्त्रियमेषयोः अंगेर्नलोपः अ
३३ गिगतौ निः अग्निः अग्निर्वैश्वानरो वह्निरित्यमरः अग्निर्वैश्वानरोपि स्यात् चित्रकाख्यौषधौ पुमानिति मेदिनी वहादेर्निः निप्रत्ययमाह वह प्रापणे वह्निः वह्निर्वै
श्वानरोपि स्यात् चित्रकाख्यौषधौ पुमानिति मेदिनी श्रिञ् सेवायाम् श्रेणिः श्रेणिः स्त्रीपुंसयोः पंक्तौ समाने शिल्पि संहताविति मेदिनी निः श्रेणिस्त्वधिरोहिणी शुश्र
वणे श्रोणिः कटिः श्रोणिः ककुद्मतीत्यमरः युमिश्रणे योनिः योनिः स्त्रीपुंसयोश्च स्यादाकारे स्मरमंदिरे इति मेदिनी द्रुगतौ द्रोणिः २ सेचनी ग्लै हर्षक्षये ग्लानिः दौर्व

पातिः अश्नोतेर श्च रश्मिः स्वादेर्निः कित् सृणिः दृश्निः अङ्गेर्नलोपश्च अग्निः वहादेर्निः वन्हिः श्रोणिः योनिः द्रोणिः ग्लानिः घृण्यादयः घृणिः १२
स्पृश पृश्निः पृष पार्ष्णिः पातेर्डतिः शाके अतिः शाकत् हन्तेरतिरंहश्च हन्ति दुरितमनया अंहतिः सृङादेः क्रिः सूरिः भूरिः अद्रिः ॥

ल्यं घृण्यादयः निकू प्रत्ययांता निपात्यंते घृ सेचने घृणिः घृणिः पुमानंशु ज्वालातरंगेष्विति हेमचंद्रः स्पृश संस्पर्शने स्पृशतेः सलोपो निपातनात् छशषेति षत्वं पृ
श्निः पृश्निरल्पतनावित्यमरः पृषु सेचने पृषेर्द्धिर्निपात्यते पार्ष्णिः पार्ष्णिः स्यादुन्मदस्त्रियां स्त्रियां हू यौ सैन्यपृष्ठे पादग्रंथ्यधरेपि चेति मेदिनी पातेर्डतिः डति
प्रत्ययमाह डित्वादिलोपः पार रक्षणे पतिः पतिर्धवे नाप्ति घीशे इति मेदिनी शाकेरतिः शत् प्रत्ययमाह शक्त शक्तो शाकत् उच्चारावस्करौ शमलं शाकृत् गूथं पुरी एमः
षं वर्चस्कमस्त्री विष्ठाविशौ स्त्रियामित्यमरः हंतेरतिरंहश्च हन हिंसागत्योः अस्मादतिः स्यात् धातोरंहादेशश्च अंहतिः प्रादेशनं निर्वपणामपवर्जनमंहतिरित्यमरः ३६
सृङादेः क्रिः क्रि प्रत्ययमाह कित्वान्न गुणः षूङ् प्राणिप्रसवे सूरिः धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षण इत्यमरः अभिधानमाला ॥ ६ ॥

यास्यरीतिनांतउदाहृतम् ॥ भृसत्तायां भूरिः भूरिर्ना वासुदेवे च हरे च परमेष्ठिनि नपुंसकं सुवर्णे च प्राज्ये स्याद्वाच्यलिंगक इति मेदिनी अद भक्षणे अद्रिः अद्रयो द्रुमशै
लार्कास्तु इत्यमरः ॥ ॐ ॥ रादे त्रिः त्रिप्रत्ययमाह रादाने रात्रिः शद्लृ शातने शत्रिः शत्रिर्ना भोधरे विश्वावित्ति मेदिनी अद भक्षणे अत्रिर्मुनिभेदः पतेरत्रिः अत्रिप्रत्यय
माह पत्लृ गतौ पतत्रिः पक्षी पतत्रात् पक्षवाचकात् शब्दान्मत्वर्थे इनितुनांतः पतत्री पतत्रिणौ मृङ् ईचिः ईचिप्रत्ययमाह मृङ् प्राणत्यागे मरीचिः मरीचिः कृपणे
दीप्तौ तु स्त्री भेदे तु पुंसि तेइ इति विश्वः मरीचिर्मुनिभेदे नागभस्त्रावनपुंसकमिति मेदिनी वेञोडित् वेञ् तंतुसंताने अस्मादीचिर्डित् स्यात् बीचिः वीचिः स्वल्पे तरंगे स्या
त् अवकाशे सुखे द्वयोरिति विश्वः पुरः कुषः कुषप्रत्ययमाह कित्वान्न गुणः पुर अग्रगमने पुरुषः बाहुलकाद्दीर्घे पूरुषः पुरुषस्त्वात्मनि नरे पुन्नागे चेति हैमः पुरु

रादेस्त्रिः शत्रिः अत्रिः पत्रिः पतेरत्रिः पतत्रिः मृङ ईचिः मरीचिः वेञो डिच्च वीचिः पुरः कुषः पुर अग्रगमने पुरुषः पृनहिकलिभ्यः उषः परुष
म् नहुषः कलुषम् पीयेरूषः पीय पाने सौत्रः पीयूषम् पेयूषम् मस्जेर्नुम्च मञ्जूषा गण्डेश्च गडिवदनैकदेशे गण्डूषः ॥

षाः पूरुषा नर इत्यमरः पृनहिकलिभ्यः उषः उषप्रत्ययमाह पृ पालनपूरणयोः परुषं परुषं कर्बुरे रूक्षे निष्ठुरोक्तौ च वाच्यवदिति मेदिनी णह बंधने नहुषः नहुषो राजविशेषे
नागभिद्यपीति हैमः कल शब्दसंख्यानयोः कलुषं त्वाविले नसोरिति विश्वः पीयेरूषः ऊषप्रत्ययमाह पीयः सौत्रधातुः पीयूषम् बाहुलकाद्गुणाभावः गुणे तु पेयूषः पीयूषो
ऽभिनवं पयः इत्यमरः पीयूषममृतं सुधेत्यमरः पीयूषं सप्तदिवसावधि क्षीरे तथामृते इति मेदिनी पीयूषममृते नव्यप्रसूतधेनोः पयस्यपीति हैमः मस्जेर्नुम् च टुमस्जो शु
द्धौ अस्मादूषः स्यात् धातोर्नुमागमश्च मित्वादंत्यात्स्वरात्परः सस्य श्चुत्वेन शः कवेजवा इति शस्य जः हसात्परस्य झ सस्येति वा जलोपः लोपाभावपक्षे जकारद्वयं मंजूषा पिट
कः पेटकः पेटा मंजूषेत्यमरः गंडेः गडि वदनैकदेशे अस्मादूषः स्यात् गंडूषः गंडूषो मुखपूरे भ्रपुष्कर प्रसृतो निमिते इति मेदिनी

देठ यति उद्दीपते आस्तिकतामिति दुर्दुरूढः नास्तिक इति नयापार

हा

सि॰ चं॰ शकादेरटः अटप्रत्ययमाह शकिगतौ शक्नुवन्तीति शकटः क्लीबेऽनः शकटोऽस्त्रीस्यादित्यमरः ककिगतौ कंकटकः सन्नाहः डुकृञ्करणे कविक्षेपे करटः काके भगंडे।

कौ॰ उ॰ करटाविन्यमरः करटो गजगंडे स्यात् कुसुंभे निंद्यजीवने एकादशादि श्राद्धे च दुर्दुरूढे पिवाद्यसेइतिमेदिनी कलिकर्योरमः अमप्रत्ययमाह कलसंख्याने कलमः

३७ कलमः शालिचौरयोरितिहेमः कलमः पुंसि लेखिन्यां शालौ पाटच्चरेपि चेतिमेदिनी कर्द कुत्सिते शब्दे कर्दमः पंकः पुल्यादेः किंदः किंदप्रत्ययमाह किंत्वान्नगुणः

पुलमहत्वे पुलिंदः जातिविशेषः कुपक्रोधे कुपेर्वा वः किंदः स्यात् पस्य वा वकारश्च कुविंदः कुपिंदः तंतुवापः कुविंदः स्यादित्यमरः नौषंजेर्घथिः षंज संगे निपूर्वा

दस्मात् घथि प्रत्ययः स्यात् घथि प्रत्ययमाह घित्वाच्चजोरितिकुत्वं प्रादेश्चेति षत्वं निषंगथिः आलिंगकः सर्त्तेर्णित् सृगतौ अस्मात् घथिः स्यात् स च णित् सारथिः नि

शकादेरटः शकटम् ककिगतौ कंकटः करटः कलिकर्योरमः कलमः कर्द कुत्सिते शब्दे कर्दमः पुल्यादेः किन्दः पुलिन्दः कुपेर्वा वः

कुपिन्दः कुविन्दः नौषञ्जेर्घथिः निषंगथिः सर्त्तेर्णिच्च सारथिः खर्ज्जादेरूरः खर्ज्जूरः कर्प्पूरम् वल्लूरम् लंगेर्वृद्धिश्च लाङ्गूलम् लांगू

रम् कुसश्च कुसूलम् कुवश्चटू दीर्घश्च कूची सिवेरूच सूची ॥ यंता प्राजिता यंता सूतः क्षत्ता च सारथिरित्यमरः खर्ज्जादेरूरं उरप्रत्ययमाह खर्ज आर्जे

वे खर्ज्जूरः स्वर्जूरे रूप्यफलयोः खर्ज्जूरः कीटवृक्षयोरितिमेदिनी कृपूसामर्थ्ये वाहुलकात् कृपोरोल इति लत्वाभावः कर्पूरं अथ कर्पूरमस्त्रियां घनसारश्चंद्रसंज्ञः सिता।

भ्रोहिमवालुकेत्यमरः वल्लसंवरणे वल्लूरं शुष्कमांसं स्यात् लंगेर्वृद्धिश्च लगिगतौ अस्मादूलप्रत्ययः स्यात् धातोर्वृद्धिश्च लांगूलं लांगूलं पुच्छशेफसोरितिमेदिनीकु

ससंश्लेषणे कुसूलः निपातनात् गुणाभावः कुसूलं कुसूलं च कुसीदं च मध्यदंतमुदाहृतं इति विश्वः कुवश्चटू दीर्घश्च कुश्शब्दे अस्माच्च टूप्रत्ययः स्यात् धातोः पाक्षिको रामः

दीर्घश्च चटूप्रत्ययमाह टित्वात् ङीप् कूची चित्रलेखनिका कुच कूचौ लनेमता वितिविश्वः सिवेरूच षिवुतंतुसंताने अस्माच्चटूस्यात् धातोश्चेरूश्च स चोदर्भीकुरःसू ३७

चीतुसीवनद्रव्ये प्यागिकाभिनयांतरे इतिमेदिनी ॥ ६ ॥

कूची प्र॰ उ॰ क्षा॰ ए॰ चे॰ वर्णं विशेषे

उल्वादयः वप्रत्ययांतानिपात्यंते उच समवाये चस्य लत्वं गुणाभावश्च उल्वं गर्भाशयो जरायुः स्यादुल्वं तु कललोऽस्त्रियामिति मेदिनी शुच शोके चस्य लत्वं गुणाभावश्च निपा
तना त् शुल्वं शुल्वं ताम्रे यज्ञकर्मण्याचारे जलसंनिधाविति मेदिनी ष्टा गतिनिवृत्तौ अस्मादं व अव क ए तो प्रत्ययो निपातनात् धातोः थस्य तश्च स्तंवः स्तवकः स्तंवो गुल्मे
तृणादीनाम प्रकांडद्रुमेपि चेति विश्वः स्तंवो प्रकांड द्रुम गुच्छयोरिति मेदिनी स्याद्गुच्छक स्तु स्तवक इत्यमरः शाशपिभ्यां दः दप्रत्ययमाह शोतनूकरणे शादः शादो जंबा
लशष्पयोरित्यमरः शादः स्यात्कर्दमे शष्पेइति मेदिनी शष्पं बाल तृणं घास इत्यमरः शपूआक्रोशे शब्दो निनादः अब्दादयः दप्रत्ययांतानिपात्यंते अवरक्षणे
वस्य वः अव्दः अब्दः संवत्सरे वारिवाह मुस्तकयोः पुमानिति मेदिनी कु शब्दे निपातनान्नुम् कुंदः कुंदो माघ्येऽस्त्री मुकुंद भ्रमिनिध्यंतरे पुनेति मेदिनी वलिमलितनि
भ्यः कयः कप्रत्ययमाह किलात्गुणनिषेधादि वल संवरणे वलयः वलयः कंठरोगे ना कंकणे पुंनपुंसकमिति मेदिनी मल धारणे मलयः मलयः पर्वतांतरे

उल्वादयः। उच समवाये। उल्वः। शुल्वम्। स्यास्तवकः शाशपिभ्यान्दः। शादः। शब्दः। अब्दादयः। अवनीत्यब्दः। कुन्दः। वलिमलितनिभ्यः कयः। व
लयम्। मलयः। तनयः। हृञोदुक् च। हरतीति हृदयम्। मिनोतेरुः॥ मेरुः। जत्र्वादयः। जत्रु। अश्रु रुरुः॥ शातयतीति शत्रुः ॥ ६ ॥

शैलांशे देशआरामे त्रिषुतनांयां तु योषितीति मेदिनी तनु विस्तारे तनयः आत्मजस्तनयः सूनुरित्यमरः हृञो दुक् हृञ् हरणे अस्मात्कपः स्यात् धातोर्दुगागमश्च ह्रियते वि
षयैरिति हृदयं मनः मिनोतेरुः रुप्रत्ययमाह डुमिञ् प्रक्षेपणे मेरुः मेरुः सुमेरुर्हेमाद्रिरित्यमरः जत्र्वादयः रुप्रत्ययांतानिपात्यंते जनी प्रादुर्भावे नस्य तो निपातना
त् जत्रुसंधी तस्यैव जत्रुणीत्यमरः तस्य स्कंधस्येत्यर्थः अश्रू व्याप्तौ अश्रु नयनजलं रु शब्दे निपातनाद्गुणाभावः रुरुः कृष्णसार रुरुन्यंकुरंकुशंवररौहिषा इत्य
मरः रुरुर्मृगे दैत्येपि चेति मेदिनी शद्लृ शातने अस्यांतः शातयतीति त्रेरिति त्रिलोपः निपातनाद्ह्रस्वत्वं शत्रुः ॥ ६ ॥ ॥

सि॰ च॰ कुसेरुभोमेदेताः कुससंस्त्वेषयो अस्मात् उंभउमई द तएते प्रत्ययाः स्युः उंभादिप्रत्यायानाह कुसुंभंकुसुंभंहेमनिमहारजनेनाकमंडल्लाविति मेदिनी कुसुमंकुसुमंस्त्री
उ॰ कु॰ रजोनेत्ररोगयोः फलपुष्पयोरिति मेदिनी कुसीदंकुसीदंजीवनेदृष्ट्यांक्लीवंत्रिषुकुसीदकेइति मेदिनी कुसितोजनपदः तंडुलादयो निपात्याः तड आघाते उलप्रत्ययो नुमाग
३२॰ मश्चनिपात्यते तंडुलः तंडुलः स्याद्विडंगे चधान्यादिनिकरे पुमानिति मेदिनी अकिलक्षणे उशप्रत्ययो निपातनात् अंकुशः अंकुशोऽस्त्रीसृणिः स्त्रियामित्यमरः चष
भक्षणे आलप्रत्ययो निपातनात् चषालः चषालो यूपकटक इत्यमरः पापानेवलप्रत्ययो निपात्यते लुगागमश्चधातोर्ह्रस्वत्वंच पल्वलमल्पसरः त्रिष्टपाप्राग रूपे
ण्यप्रत्ययः अतइत्वंचनिपात्यते धिष्ण्यं धिष्ण्यंस्थानेगृहेभे ऽग्नावित्यमरः धिष्ण्यंस्यान्नाग्निसद्मसुक्रक्षेशकौचेति मेदिनी शलगतौ पप्रत्ययः शल्यंश ।
ल्यंतुनस्त्रियांशंकौक्लीवंस्याडेपुनोमरे मदनद्रुम्नाविधोर्नेति मेदिनी मृशकयम्यविभ्यः क्लः क्लप्रत्ययमाह कितान्नगुणः मृङ्वंधनेमूलंमूलंबुघ्नेऽङ्घ्रिनामक इत्यमरः
कुसेरुभोमेदेताः। कुसुंभम्। कुसुमम्। कुसीदम्। कुसितः। तण्डुलादयः। तड आघाते। तण्डुलाः। अकिलक्षणे। अङ्कुशः। चष। चषालः। पल्वलम्।
त्रिष्टपा। धिष्ण्यम्। शल्यम्। मृङ्। शकयम्यविभ्यः क्लः। मूलम्। शल्कः। अम्लः। अविगनो। अंबुः। मारेर्य। मायाः। छायाः। शस्यम्। पुत्रः। सव्यम्। जनेर्य
शल्कशकलोशल्कः शल्कः प्रियंवदे इत्यमरः अमरोगेचुरादिरस्यंतः वाहुलकादुपधाह्रस्वः णेरिनिटिलोपः। अम्लः अम्लोरसविशेषेस्यात् कृ। जाया। जन्यम् ॥
तु क्लीवे चगेरिकौषधाविति मेदिनी अविशब्दे अंब्लोरसः मारेर्यःप्रत्ययमाह मामानेमायामायास्याच्छांवरीवुद्ध्यो र्यः पीतांवरेसुरेइति मेदिनी छोछेदनेछाया
छायास्यादातपाभावेप्रतिबिंवार्कयोषितोःपालनोत्कर्षयोः कांतिसत्कोभायंक्तिपुस्त्रियामितिविश्वः षसस्वप्नेसस्यंवृक्षादीनांफलेसस्यमित्यमरः पुत्रः अभिषवेसव्यं रामः
सव्यंवामेप्रतीपेचेति मेदिनी सव्यंदक्षिणवामयोरिति विश्वः जनेर्यक्जनजननेअस्माद्यक्प्रत्ययः स्यात् जनसनेनितिवात्वंजन्यंजायाजन्यंहट्टेपरीवादेसंग्रामेचनपुंसकं ३९
जन्यामातृवयस्यायांजन्यःस्याज्जनकेपुमान् त्रिषूत्पाद्येनवोढा[illegible]ता[illegible]ति भृत्ययोरितिमेदिनी ॥

जमित्राप्त

अध्मादयः । यक् प्रत्ययांतानि निपात्यंते हन हिंसागत्योः धातोरडागमः उपधालोपश्च निपातनात् हनो घ्नेइतिघः अघ्या नञ्पूर्वोहंतेर्यक् उपधालोपश्चेत्यन्ये अघ्यः प्रजापतिः
माहेयी सौरभेयो गौरुस्रा माता च शृंगिणी अर्जुन्यघ्न्या रोहिणी स्यादित्यमरः कनीदीप्तौ कन्या कन्याकुमारिकायां औषध्यां राशिभेदयोरिति विश्वः वंध बंधने ववयोरैक्यात्
निरनुनासिकत्वान्नलोपाभावः वंध्यः वंध्यस्त्वफलवृक्षादौ स्त्रियांस्याद प्रजःस्त्रियामिति मेदिनी संपूर्वाद्ध्यैञो यक् आतोलोपश्च निपातनात् संध्या सायंसंध्या पितृप्रसूरित्यम
रः अर्त्यादेर्वनूवनू प्रत्ययमाह ऋगतौ अर्वाअर्वा तुरगगर्ह्योरिति विश्वः अर्वा तुरंगमे पुंसि कुत्सिते वाच्यलिंगकः इति मेदिनी एपालने पर्व पर्वल्कीवं महेग्रं
थौ प्रस्तावे लक्षणांतरे दर्शप्रतिपदोः संधौ विषुवत् प्रभृतिष्वपीति मेदिनी ध्याप्योः संप्रसारणं ध्यै चिंतायां प्यै इ [illegible] वृद्धौ आभ्यां वन्प्रत्ययः स्यात् धातोः संप्र
सारणं च धीवा कर्मकरः पीवा स्थूलः अदेर्धश्च अद भक्षणे अस्मात् वन् स्यात् दस्य धश्च अध्वा मार्गः धातोरिः इ प्रत्ययमाह ॰ यज देवपूजादौ यजिः वट वेष्टने वटिः वु

अध्मादयः यक् अघ्या कनी दीप्तौ कन्या वन्ध्या अर्त्यादेर्वन् अर्वा एप पर्व ध्याप्योस्सम्प्रसारणम् प्यैङ् [illegible] वृद्धौ पीवा धीवा अदेर्धः अध्वा
धातोरिः यजिः वट वेष्टने वटिः जनिः बोधिः हरिः वर्तिः नाम्युपधात्किः कृषिः ऋषिः शुचिः लिपिः तूलनिष्कर्षे तूलिः क्रमितमिशतिस्तम्भा ॥ ३ ॥

ध अवगमने बोधिः बोधिः पुंसि समाधे भेदे पिप्पलपादपे इति मेदिनी हृञ् हरिः हरिर्विष्णावहाविंद्रे भेकेसिंहे हये [illegible] मः तइच क्रिमिः तिमीः शितिः सि
रवौ चंद्रेकीले शुवंगे च यमे वाते प्रकीर्तितः वृतु वर्तने वर्तिर्दीपोपकरणं नाम्युपधात्किः नाम्युपधाद्धातोः किः स्यात् किप्रत्ययमाह कित्वान्न गुणः कृष विलेखने
कृषिः ऋषी गतौ ऋषिः ऋषिर्वेदे वशिष्ठादौ दीधितौ च पुमानयमिति मेदिनी शुच शोके शुचिः शुचि [illegible] ग्रीष्मा [illegible] शृंगारे [illegible]
लिप उपदेहे लिपिः बाहुलकात् त्वमपि लिविः तूल निःकर्षे तूलिः कूर्चिका क्रमितमिशतिस्तंभाम तइः एभ्यः किः स्यात् एषामत इकारादेशश्च क्रमूपादविक्षेपे क्रिमिः निपात
नाद्रस्य संप्रसारणमपि भवति कृमिः क्रिमिर्नाकृमिवत्कीटे इति मेदिनी तमुकांक्षायां तिमिः तिमिर्मत्स्यभेदः शतिः सौत्रो धातुः शितिः शितिः कृष्णसिते भूर्जे इति विश्वः शितिर्भूर्जे

ध्वामाढे श्र द्द म त्रि ग ग न्ये छे चपं सिध्य व लौ मु द्वे उ प
ने चि श्चिति
मेदिनी

मनेरन्तउः मननात्ताने अस्मात्किः स्यात् अकारस्योकारादेशश्च मन्यते जानातीति मुनिः मुनिः पुमान् वसिष्ठादौ वंगसेनेतरोजिने इति मेदिनी वर्णो वल्लिः वर्णिः सौत्रोः स्मा।
त्किः स्यात् धातोर्वलिरादेशश्च वलिः करोपहारयोः पुंसि वलिः प्राण्यंगजे स्त्रियां ववयोरैक्याद्वलिः वपादेरिञ् इञ् प्रत्ययमाह ज्ञित्वाद्वृद्धिः टुवपू बीजतंतुसंताने
वापिः राजृ दीप्तौ राजिः राजिः स्त्री पंक्तिरेखयोरिति मेदिनी वृञ् वरणे ण्यंतः ञेरिति ञिलोपः वारिः वारिः स्त्री तासरस्वत्यां वारिह्रीवेद नीरयोरिति विश्वः कृदिकारादिति पू
तुपाक्षिकः सर्वत्र भवति स्त्री तु गजवंधनीत्यमरः वारिः पथिकसंहतौ इति च नहोभः णह वंधने अस्मादिञ् स्यात् हस्य भश्च नाभिः नाभिर्मुख्यनृपे चक्रमध्य क्षत्रिय
योः पुमान् द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे इति मेदिनी जनी प्रादुर्भावे इञ् जनिवध्योरिति न वृद्धिः जनिः कृदिकारादिति पक्षे ईप् जनी जनी स्त्री मंतिनी
वध्वोरुत्पत्तावौषधौ तथेति मेदिनी अज गतौ क्षपणे च वाहुलकाद्जेर्वीभावो न आजिः संग्रामः अत सातत्यगमने आतिः पक्षी अशेरुट् अश्नोत्कु व्याप्तौ अस्मादि

मुनेरंतउत् मुनिः वर्णो वलिश्च वर्णवर्णने सौत्रः वलिः वपादेरिञ् वापिः राजिः वारिः नहोभः नाभिः जनिः आजिः आतिः अशे रुट् राशिः
वातेर्डित् विः नीव्यादयः निपूर्वो व्येञ् नीविः प्रह्विः समाने ख्या यते जनेरिति सखा आङ् पूर्वौ श्री हनी अग्निः अहिः ६ ॥

ञ् प्रत्यये धातोरुडागमश्च स्यात् राशिः राशिर्मेषादिपुंजयोरिति मेदिनी वातेर्डित् वा गति गंधनयोरस्माद्डित् स्यात् डित्वादृिलोपः विः पक्षी स्त्रियां वीत्यपि नीव्यादयः ड्डि
प्रत्ययांता निपात्यंते निपूर्वः व्येञ् संवरणे डित्वादृिलोपः नेर्दीर्घो निपात्यते यत इति यलोपः नीविः कृदिकारादिति नीपि नीवी स्त्री कटौ वस्त्रवंधेपि नीवीपरिपणेपि चेत्यमरः प
पक्षिः ह्वगो मूलधनेह्वञ् हरणे टिलोपे प्रह्विः पुंसि वांधुत्र ही कूपे इत्यमरः ख्या प्रकथने टिलोपे सति यलोपः सह्यादेरिति समानस्य सादेशः सेर्डो धेरिति ङा सखा आङ् पू
र्वौ श्री हनी श्रिञ् सेवायां टिलोपे सति आङो ह्रस्वो निपातनात् अग्निः स्त्रियः पाल्यग्निकोट इत्यमरः दंत्यसकारवान्सुन्दरं दंतः अस्त्रः कोणे चैकपुंसि क्लीवमश्रुणि शोणि
णित इति मेदिनी आङ् पूर्वो हन हिंसागत्योः टिलोपे सति आङो ह्रस्वो निपातनात् अहिः अहिर्वृत्रासुरे सर्पे इति मेदिनी॰ ॥ ६ ॥

कादेः किः किप्रत्ययमाह किरत्वान्न गुणः कृ विक्षेपे अद्रितद्रुरितीर किरिः वराहः शूकरो घृष्टिः कोलः पोत्री किरिः किटिरित्यमरः दृकृज्ञाभ्यश्चेतिकप्रत्यये अदन्तोप्यस्ति
त्वचिः त्वाचः किरोपिस्यात् किरो पोतः पथः पथि इति द्विरूपकोशः गॄनिगरणे गिरिः गिरिर्ना नेत्ररुग्भिदि अद्रौ गिरिः अके योषित् गी र्णौ पूज्येपुनस्त्रिषु इति मेदिनी एव
पालनादौ पोरुरित्युर् पुरिर्नगरं राजानरि च मन् धातोः मन् प्रत्ययमाह डुकृञ् करणे क्रियते इति कर्म्म कर्म व्याप्ये क्रियायां च पुंनपुंसकयोर्मतमिति रुद्रः चर गत्यादौ चर्म चर्म
कृत्तौ च फलके इति मेदिनी भस भर्त्सनदीप्त्योः भस्म जनजनने जन्म छद अपवारणे चुरादिः इस्मनितिह्रस्वः त्रेरिति त्रिलोपः छद्म त्रैङ् पालने सुष्ठु त्रायते इति सु
त्रामा इन्द्रः वृंहे नेस्यत्व अः वृहिवृद्धाववस्मान्मन् स्यात् नुमो नस्य अकारे कृते रत्वं ब्रह्म ब्रह्म न त्वे तपो वेदे न द्वयोः पुंसि वेधसि ऋत्विग् योगभिदो र्विप्रे इति मेदिनी ब्रह्म ता
त्वं तपो वेदे ब्रह्मा विप्रः प्रजापतिरित्यमरः नामाद यः मन् प्रत्ययांतानि पात्यंते म्ना अभ्यासे म्नायते ऽनेनेति मन्लोपो निपातनात् नाम आख्या ह्वे अभिधानं च नामधेयं च

कादेः किः कृ किरिः गॄ गिरिः पॄ पुरिः मन् धातोः कर्म्म चर्म्म भस भर्त्सनदीप्त्योः भस्म जन्म छद्म सुत्रामा वृहेर्नस्यत्व अः ब्रह्म नामाद यः म्ना नाम षित्र्
सीमार्थम् व्योम रुहनः रोम पैशाषणे पाप्मा वेमा अतेर्मनिण् आत्मा हनिमशिभ्यां सिकः हंसिका मशशब्दे मक्षिका कोररः कबरी गिरउडः ॥

नाम चेत्यमरः षोंतकर्मणि सामसाम क्लीबमुपायस्य भेदे वेदांतरेपि चेति मेदिनी षिञ् बंधने सिनोतेर्दीर्घो निपात्यते सीम सीमसीमेस्त्रियामुभे इत्यमरः व्येञ् संवरणे अंत्या
स्यात्वम् निपातनात् गुणः व्योम रुह शब्दे रोम गात्रकेशः पा पाने पुगागमो निपात्यते पाप्मा पापम् वेञ् तंतुसंताने वेमा तंतुवायदंडः अई चादिः अतेर्मनिण् णित्वाद्वृद्धिः
इकार उच्चारणार्थः अत सातत्यगमने आत्मा आत्मा पुंसि स्वभावेपि प्रयत्नमनसोरपि धृतावपि मनीषायां शरीरब्रह्मणोरपीति मेदिनी हनिमशिभ्यां सिकः आभ्यां सिकप्र
त्ययः स्यात् सिकप्रत्ययमाह हन हिंसागत्योः हंसिका हंसिका हंसयोषिति मश शब्दे रोषकृते च छ शषे ति षत्वम् षढोः कः सि इति कत्वं षत्वं च मक्षिका मक्षिका भेने शल्लीस्यादि
ति हारावली कोररः कुशब्दे अस्मादरः स्यात् कबरः पावकः बवयोरैक्यात् ङीपि प्रत्यये कबरी केशविन्यासः अन्यत्र कबरा गिरउडः गॄनिगरणे अस्मादुडप्रत्ययः गरुडः

पोसा…
ग…डः

सि॰ च॰ इदेः कमिर्नलोपश्च इदि परमैश्वर्ये अस्मात् कमिः स्यात् नलोपश्च कित्वाद्गुणो न इकार उच्चारणार्थः इदमिति सर्वादिगणशब्दोयं सन्निहितपरामर्शी कायतेर्डिमूः के शब्दे अ
कौ॰ उ॰ स्मात् डिमू प्रत्ययः स्यात् डित्वाट्टिलोपः किमू धातोस्त्रः त्रप्रत्ययमाह वस निवासे वस्त्रं असु क्षेपणे अस्त्रं अस्त्रं प्रहरणे चापे करवालेन पुंसकमिति मेदिनी छद अपवारणे चु
४० रादिर्ण्यंतः ह्रस्वेनेति ह्रस्वत्वं ञेरिति णिलोपः छत्रं सिविमुच्योष्टेरूः आभ्यां क्रप्रत्ययः स्यात् अनयोष्टेरूकारादेशश्च कित्वान्न गुणः षिवु तंतुसंताने सूत्रं तु सूचनाग्रंथे सू
त्रेतंतु व्यवस्थयोरिति मेदिनी मुच्लृ मोक्षणे मूत्रं अमादेक्तः अम गति शब्दसंभक्तिषु अनुनासिकस्येति दीर्घः आन्त्रं चिञ् चयने चित्रम् आलेख्याश्चर्ययोश्चित्रमित्यमरः ञिमि
दा स्नेहने मित्रम् मित्रं सुहृदि मित्रो सूर्ये पुंसि इति मेदिनी उपदाहे पुंत्वं इष्टः उष्ट्रः क्रमेलकमयमहांगाद इत्यमरः पुञो ह्रस्वश्च पूञ् पवने अस्मात् क्रः स्यात् धातोर्ह्रस्व
नित्त्वपुनाति सर्वं श्मानि इति पुत्रः पुन्नरकस्तस्मात् त्रायत इति आतोनुपसर्गे कः इति कप्रत्यये पुत्र इति व्युत्पत्त्यंतरं स्त्यायतेर्ड्रट् स्त्यै ष्ट्यै शब्दसंघातयोरस्मात् ड्रट् स्यात् टित्वाद्
इन्देः कमिर्नलोपश्च इदम् कायतेर्डिमूः धातोस्त्रः वस्त्रम् अस्त्रम् छत्रम् सिविमुच्योष्टेरूः षिवुसूत्रम् मुच्लृ मूत्रम् अमादेः क्तः आन्त्रम् चि
त्रम् मित्रम् इष्ट उष्ट्रः पूञो ह्रस्वः पुत्रः स्त्यायतेर्ड्रट् स्त्री गमेरा गात्रम् चरादेरित्रच् चारित्रम् वादित्रम् अशित्रादिभ्य इत्रोत्रौ अशित्रम् व
हित्रम् धरित्री अमित्रः त्रैङ् त्रोत्रम् चितेः कणश्च कस्य चिक्कणम् ॥ टिडित्वाट्टिलोपः यवयोर्वसे इति यलोपः स्त्री योषिदबला योषा नारी सीमंतिनी वधू
रित्यमरः गमेरा गम्लृ गतौ अस्य मस्याकारः स्यात् त्रप्रत्ययश्च गात्रं गात्रमंगे कलेवरे स्तंबेरमाग्रजंघादिविभागेपि समीरित इति विश्वः चरादेरित्रच् इत्रच्प्रत्ययमाह त्रि
त्वाद्गुणः चर गतौ चारित्रं वद व्यक्तायां वाचि ण्यंतः वादित्रम् तूर्यादि अशित्रादिभ्य इत्रोत्रौ अश भोजने चतौ अशित्रो अशित्रौ आदी ये षां ते अशित्रादयस्तेभ्यः इत्यादीनि। राम॰
अयमागतः शब्दः प्रत्येकं संबध्यते इत्यादिशब्दः प्रत्येकं योज्यः अमूङ्व्याप्तो इत्यादिभ्य इत्रः प्रत्ययः स्यात् त्रैङ् पालने इत्यादिभ्यः उत्रप्रत्ययः स्यात् अमूङ् अशि ४०
त्रं वह प्रापणे वहित्रम् धञ् धारणे धरित्रं ईप् धरित्री अम गतौ अमित्रः शत्रुः मित्रं नेति विग्रहे त्वमित्रमिति नपुंसकं त्रैङ् आत्वे उत्रे चत्रोत्रं प्रहरणं चञ् वरणे वरु ॥

कृत्कोव हंसप्रागेहार्च्यांत्रापोतुक कृत्णक हस्तसूत्रं प्रतिसरः कालिकोनवदुंलीयक हेमचन्द्रः

त्वमप्रावरणंचितेः कणः कश्च चितीसंज्ञानेअस्मात् कणप्रत्ययः स्यात् तस्यकश्चवाहुलकाद्गुणाभावः चिक्कणं चिक्कणमसृणंस्निग्धमित्यमरः ॥ ॥ सूचेःस्मः सूचपै
शून्येचुरादिरस्मात् स्मप्रत्ययः स्यात् णेरितिणिलोपः कुत्वषत्वेसूक्ष्मं सूक्ष्मंस्यात्कटकेऽध्यात्मे पुंसत्वौत्रिषुचाल्पकेइतिमेदिनी पातेर्डुम्सुः पारक्षणेऽस्मात्डु
म्सुप्रत्ययः स्यात् डित्त्वाट्टिलोपः उदित्वात् स्त्रियामीसुपुंसी पुंसोऽसुङित्यसुङ् पुमान् भुजादेःकिष्यः भुजपालननादौअस्मात् किष्यप्रत्ययः स्यात् कित्वान्नगुणः भुजि
ष्यः भुजिष्यस्तुस्वतंत्रेचहस्तसूत्रेकदासयोरितिमेदिनी भुजिष्यः परिचारकइत्यमरः वसादेस्तिः तिप्रत्ययमाह वसनिवासे वसआच्छादनेच वस्तिः वस्तिर्द्वयो
र्निरूहेनाऽध्यधोभूमिदशासुचेतिमेदिनी॥ वस्तिर्नाभेरधोद्वयोरित्यमरः शासुअनुशिष्टौ शास्तिः राजदंडः अगसुक्षेपणेविंध्याख्यमगमस्यतीतिअगस्तिः हलादेरि
तिणिलोपः अगस्तिः कुंभयोनौचवंगसेनतरौपुमानितिमेदिनी वौतसेः तसुउपक्षयेअस्मात् विपूर्वात्तिः स्यात् वितस्तिः अंगुष्ठेसकनिष्ठेस्यात् वितस्तिर्द्वादशांगुः

सूचेस्मः सूक्ष्मम् पातेर्डुम्सुः पुमान् भुजादेःकिष्यः भुजिष्योदासः वसादेस्तिः वस्तिः शास्तिः अगमस्यतीतिअगस्तिः वौतसेः तसुउपक्ष
ये वितस्तिः पत्तिः हणातेर्हूस्वश्चदृतिः कृतृकृपिभ्यः कीटः किरीटम् तिरीटम् कृपीटम् धातोरसुः चेतः सरः पयः अशेर्युट् स्तुतौस्तूयतेइतियशः

लैइत्यमरः स्त्रीपुंसयोर्वितस्तिः स्यादित्यमरमालापदगतौपत्तिः हणातेर्हूस्वः दृविदारणेअस्मात्तिः स्यात् धातोर्हूस्वत्वंच दृतिः दृतिश्चर्मपुटेमत्स्येनाइतिमेदिनी कृतृ
कृपिभ्यः कीटः कीट प्रत्ययमाह कित्वान्नगुणः कृविक्षेपेऋतइरित्तीरकिरीटंकिरीटंमुकुटेनस्त्रीतिचंद्रगोमीतृप्लुवनसंतरणयोः ऋतइरितीरतिरीटं सुवर्णशिरोवे
ष्टनंच कृपूसामर्थ्ये कृपीटमुदरेनीरेइतिविश्वः धातोरसुः असुप्रत्ययमाह उदित्वादीप् चितसंज्ञाने चितीसंज्ञानेचुरादिश्च चेतः चित्तंतुचेतोहृदयं स्वांतंहृन्मानसंमनइत्य
मरः सृगतौसरः इपिसरसीसरसीतुमहासरइतिशब्दार्णवः महांतिसरांसिसरस्यइतिभाष्यम् पयगतौपीङ्पानेचपयः पयः स्यात् क्षीरनीरयोरितिमेदिनी अशेर्युः
ट्स्तुतौअसृङ् व्याप्तावस्मात् असुः स्यात् धातोर्युडागमश्चयशः कीर्तिः ॥

सि॰ च॰ उञ्जेर्बलेव लोपः उब्जआर्जवे अस्मादसुः स्यात् वलेवाच्ये वस्य लोपश्च ओजः ओजोदीप्तावववष्टंभे प्रकाशवलयोरपीति मेदिनी श्रिञः शिरः किच्च श्रिञ् सेवायां अस्मा
कौ॰ उ॰ दसुः स्यात् स च कित् धातोः शिरादेशश्च शिरः उत्तमांगं शिरः शीर्षमित्यमरः कप्रत्यये तु शिरदूत्यदंतोपि शिरोवाची शिरोदंतो रजोवाची रजस्त्वयेति कोशांतरं पिंडं दद्यान्न
५१ याशिरे इति वायुपुराणे कुण्डलैर्घृष्टगंडानां कुमाराणांतरस्विनां निचः कर्त्तिशिरान्नद्रोणिनीलेभ्यद्रुवपंकजानिति महाभारतं अर्त्तेर्हरुट् ऋगतावस्मादसुः स्यात् सच्च कित् धा
तोः रादेशश्च उरः उरो वत्सि च वक्षश्चेत्यमरः व्याधौ मुट् च ऋगतौ अस्मादसुः स्यात् प्रत्ययस्य मुडागमश्च स्यात् व्याधौ वाच्ये अर्शः गुदव्याधिः उदके नुट् अर्त्तेरसुः स्यात् तस्य नुट् च
अर्णः जलम् इण आगसि इण गतावस्मात् पापे वाच्ये ऽसुः स्यात् प्रत्ययस्य नुडागमश्च पापे वाच्ये एनः पापम् स्रुरीभ्यां तुट् च आभ्यामसुः स्यात् प्रत्ययस्य तुडागमश्च स्रु गतौ स्रो

उब्जेर्बे चेर्ल्लोपः ओजः श्रिञः शिरः किच्च शिरः अर्त्तेर्हुरुट् उरः अर्त्तेर्व्याधौ मुट् अर्शः उदके नुट् अर्णः इण आगसि एनः स्रुरीभ्यां तुट् स्रो
तः रेतः पातेरुदके थुट् पाथः अदेर्भक्ते धौ नुम् च अन्धः आप उदके ह्रस्वो नुम् भौ अम्भः नहेर्दिवि भः नभः इण आगः ऽपराधे आगः ॥

तः स्रोतो वुवेगेन्द्रिययोरिति विश्वः रीङ् श्रवणे रेतः शुक्रे पारदे चेति मेदिनी पातेरुदके थुट् पा रक्षणे अस्मादसुः प्रत्ययस्यात् प्रत्ययस्य थुडागमश्च पाथः कवंधमुदकं पा
थ इत्यमरः अदेर्भक्ते धौ नुम् च अद भक्षणे अस्मादसुः स्यात् धातोर्दस्य धो नुम् च अंधः भिस्सा स्त्री भक्तमंधोन्नमित्यमरः आप उदके ह्रस्वो नुम् भौ आप्नोतेरसुः स्यात्
धातोर्ह्रस्वत्वं च नुमागमो भश्चान्तादेशः उदके वाच्ये अंभः उदकं नहेर्दिवि भः णह बंधने अस्मात् गगने वाच्ये असुः स्यात् भश्चान्तादेशः नभः नभो व्योमन्नभो मेघो श्रा एमः
६ वणे च पतामहे घ्राणे मृणालसूत्रे च वर्षासु च नभः स्मृत इति विश्वः नभः खं श्रावणो नभा इत्यमरः नभं तु नभसा सार्द्धमिति द्विरूपकोशः इण आग पराधे इण गतावस्माद ५१
सुः स्यात् अपराधे वाच्ये धातोरागादेशश्च आगः पापापराधयोरिति विश्वः आगोपराधो मंतुश्चेत्यमरः ॥ ॥ ६ ॥ ॥ ॥

अमेर्हुक् अभिगत्यादावस्मादसुः स्यात् धातोर्हुगागमश्च अंहः इति गच्छंत्यधस्तादनेनेति अंहः दुरितं रमेश्च रमु क्रीडायामस्मादसुः स्यात् धातोर्हुगागमश्च रंहः वेगः
देशे वाच्ये रमेरसुः स्यात् धातोर्मस्य हश्च रहः रहस्तत्वे रते गुह्ये इति मेदिनी रंज्यादेः कित् असुः स्यात् स च कित् रंज रागे कित्वान्नलोपः इति नलोपः रजः रजः क्लीबं
गुणांतरे आर्तवे च परागे च रेणुमात्रेपि दृश्यते इति मेदिनी कप्रत्यये अकारांतोपि रजोयं रजसा साई स्त्रीपुष्प गुणधूलिषित्यजयकोशः भूसत्तायां नु धातोरित्यु
त्र भुवः अंतरिक्षं पक्षं तत्प्रतिरूपकमव्ययमिदं वसेर्णित् वस निवासे अस्मादसुः स्यात् स च णित् णित्वाद्वृद्धिः वासो वस्त्रम् चंदेरादेश्च छः चदि आह्लादने अ
स्मादसुः स्यात् धातोश्च स्य छश्च छंदः छंदः पद्यप्रभेदेपि स्वैराचाराभिलाषयोरिति मेदिनी कप्रत्यये अदंतोप्ययं छंदावभिप्रायवशाविति द्विरूपकोशः वचादेस्सु
ट् च परिभाषणे इत्यादिभ्योऽसुः स्यात् प्रत्ययस्य सुडागमश्च चस्य कत्वे सस्य षत्वं वक्षो हृदयं डुपचष् पाके पक्षः पक्षसी तु स्मृतौ पक्षौ इति नञि हन एह च असिप्रत्य

अमेर्हुक् रमेश्च अंहः रंहः देशे ह्वरमतेऽस्मिन् रहः रंज्यादेः कित् रजः भुवः वसेर्णित् वासः चंदेरादेश्च छः छन्दः वचादेः सुट् वक्षः प
क्षः नञि हन एह च अनेहा अनेहसौ विधाञो वेध च वेधाः चन्द्रे माङो डित् चन्द्रमाः पुरसि धाञः पुरोधाः उषः कित् उषः दमेरुनसिः

यः नञुपपदे हंतेरसिप्रत्ययः स्यात् धातोरेहादेशश्च इकार उच्चारणार्थः हन हिंसागत्योः उशनसामिति निसेडौ अनेहा कालः विधाञो वेध च ॥ दमुनाः ॥
डुधाञ् धारणादौ विपूर्वाद् अस्मादसिः स्यात् सोपसर्गस्य धातेः वेधादेशश्च विदधातीति वेधाः अत्वसंतस्येति दीर्घः वेधाः वेधाः पुंसि हृषीकेशे बुधे च परमेष्ठिनीति मेदिनी चं
द्रे माङो डित् चंद्रोपपदात् माङोऽसिः स्यात् स च डित् डित्वाट्टिलोपः माङ् माने चंद्रं रजतममृतं च मिमीतेऽसौ चंद्रमाः अत्वसंतस्येति दीर्घः पुरसि धाञः पुरस्शब्दे उपपदे
धाञोऽसिप्रत्ययः स्यात् डुधाञ् धारणादौ पुरोधाः पुरोधास्तु पुरोहित इत्यमरः उषः कित् उष दाहे अस्मादसिः स्यात् स च कित् कित्वान्न गुणः उषः प्रभातं दमेरुनसिः दमु उप
शमे अस्माद् उनसिः स्यात् दमुनाः सप्तार्चिर्दमुनाः शुक्र इत्यमरः ॥

वशेः कनसिः वशकांतावस्मात् कनसिः स्यात् कित्वाद्ग्रहादिनेति संप्रसारणं उशना । उशना भार्गवः कविरित्यमरः ॥ अंगिरसादयः ॥ असिप्रत्ययान्ता निपात्यन्ते अगिगतौ अस्मिन्
प्रत्यये रुडागमो निपातनात् अंगिराः ऋषिभेदः सृगतावपपूर्वः अप्सरसः स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा इति शब्दार्णवः अप्सरस्त्वप्सराः प्रोक्ताः सुमनाः सुमनस्सु
चेतिद्विरूपकोशः रुशब्दे पुरुपूर्वः पुरुशब्दान्तस्य दीर्घो निपातनात् पुरूरवाः ‌‌पुरूरवाः पुरूरवा बुधसुतो राजर्षिश्च पुरूरवा इत्यमरः ॥ ॐ ॥ इत्युणादिषु चतु
र्थः पादः ४ अदिभुवोडुतच् अदित्यव्ययमाकस्मिकार्थे तस्मिन्नुपपदे भूधातोर्डुतच् प्रत्ययः स्यात् डित्वाट्टिलोपः अद्भुतमाश्चर्यम् गुधेरूमः गुध परिवेष्टने अस्मा
दूमः स्यात् गुध्यते वेष्ट्यते प्राणिभिरिति गोधूमः गोधूमो नागरंगे स्यादोषधीव्रीहिभेदयोरिति मेदिनी मसेरूरः मसी परिणामे अस्मात् ऊरः स्यात् मसूरः त्वहेः

वशेः कनसिः उशना अंगिरादयः अगि अङ्गिराः अपपूर्वस्सर्त्तिः अप्सराः पुरुपूर्वो रौतिः पुरूरवाः इत्युणादौ चतुर्थः पादः अदिभुवोडुतच्
अद्भुतम् गुधेरूमः गोधूमः मसेरूरः मसूरः त्वहेः क्वोहलोपः त्वणम् दंसेष्टोनन्ना च दासः दंशेश्च दाशः सौरमेः कः सोर्दीर्घः सूरतः पूञो
यण्णुक्ह्रस्वश्च पुण्यम् स्रंसतेः शिर्यस्य कित्वं कुट् च शिक्यम् ॥ क्वोहलोपः त्वह हिंसायामस्मात् क्वः स्यात् धातोर्हस्य लोपश्च कित्वाद्गुणाभावः त्वणं दं
सेष्टोनन्ना च दसि दंश दर्शनयोरस्माट्टप्रत्ययः नस्यात्वं च टित्वान्ङीप् दासः दासः शूद्रे दानपात्रे भृत्यधीवरयोरपीति विश्वः दंशेश्च अस्माद् पिटः स्यात् नस्यात्वं च दाश
कैवर्त्ते दाशधीवरावित्यमरः सौरमेः क्तः सोर्दीर्घः रमु क्रीडायां सुपूर्वोदस्मात् क्तः स्यात् पूर्वपदस्य दीर्घश्च कित्वाल्लोपः अनुदात्तनामिति मलोपः सूरतः उपशान्तो दयालु
श्च पूञो यण्णुक् ह्रस्वश्च पूञ् पवनेऽस्माद्यः प्रत्ययः स्यात् धातोर्णुक् ह्रस्वश्च पुण्यं पुण्यं मनोज्ञेऽभिहिते तथा सुकृतधर्मयोरिति विश्वः स्रंसतेः शिर्यस्य कित्वं कुट् च स्रंसु
अधः पतने अस्माद्यः स्यात् स च कित् प्रत्ययस्य कुडागमश्च धातोः शिरादेशश्च शिक्यम् ॥

अर्तेः क्युरुरच ऋ गतावस्मात् क्युः प्रत्ययः स्यात् धातोरुरादेशश्च कित्वान्नगुणः युवोरित्यनादेशः उरणः मेढ्रोरभ्रोरणोर्णायुमेषवृष्णय एडक इत्यमरः उदिदृणातेरः उदोदल्लोपश्च दृ विदारणे अस्मादुदूपूर्वादः स्यात् उदोदस्य लोपश्च उदरं खनेर्मुट् डप्रत्ययः खनु अवदारणे अस्मात् डः प्रत्ययः स्यात् धातोर्मुडागमश्च डित्वाट्टिलोपः मुखं निःसरणे वक्त्रे प्रारंभोपाययोरपि संध्यंतरे नाटकादौ शब्देपि च नपुंसकमिति मेदिनी मुखमपाये प्रारंभे श्रेष्ठे निःसरणास्ययोरिति हैमः अमेः सः अम गतावस्मात्सप्रत्ययः स्यात् अंसः स्कंधो भुजशिरोंसोऽस्त्रीत्यमरः अंसः स्कंधे विभागे चेति विश्वः मुहेः खो मूर्च मुह वैचित्ये अस्मात्खप्रत्ययः स्यात् धातोर्मूरादेशश्च मुह्यति इति मूर्खः अज्ञे मूढयथाजातमूर्खवैधेयबालिशा इत्यमरः नहेर्ह्लोपश्च नह बंधने अस्मात्खप्रत्ययः स्यात् हकारस्य लोपश्च नखः २ करुहे शं धे

अर्तेः क्युरुरच। उरणः। उदिदृणातेरः उदोदल्लोपश्च। उदरम् खनेर्मुट् डप्रत्ययः। मुखम्। अमेः सः। अंसः। मुहेः खो मूर्च मूर्खः। नहेर्ह्लोपश्च। नखः। शीङो ह्रस्वश्च। शिखा। माङः ऊखो मयूच। मयूखः। गलेः फोऽस्योच्च। गुल्फः। स्पृशेः श्वणोष्टे च। पर्शुः। पार्श्वः ॥

ग्रह... ह्न्येन खं न स्त्रीति विश्वः नखी स्त्री क्लीबयोः शुक्तौ नखरे पुंनपुंसकमिति मेदिनी शीङो ह्रस्वश्च शीङ् स्वप्ने अस्मात्खः स्यात् धातोर्ह्रस्वश्च ह्रस्वविधानसामर्थ्यान्न गुणाभावः शिखा शाखा बर्हिचूडा लांगलिक्य ग्रमात्रके चूडामात्रे शिफायां च ज्वालायां प्रपदेपि चेति मेदिनी माङः ऊखो मयूच माङ् माने अस्मादूखप्रत्ययः स्यात् धातोर्मयूरादेशश्च मयूखः मयूखस्त्विट्करज्वालास्वित्यमरः गलेः फः गल्स चगल अदने अस्मात् फप्रत्ययः स्यात् धातोरकारस्योत्वं च गुल्फः तद्ग्रंथी घुटिके गुल्फावित्यमरः तयोः पादयोर्ग्रंथी इत्यर्थः स्पृशेः श्वणोष्टे च स्पृश संस्पर्शने अस्मात् श्वण श्वणौ प्रत्ययौ स्तः धातोः प इत्यादेशः श्वणित्वाद्वृद्धिः पर्शुः पार्श्वः पर्शुः स्त्री कक्षयोरध इति । पार्श्वमंतिके कक्षाधोऽवयवे ... पर्शुसमूहयोरिति हैमः ॥ पार्श्वा

सि॰ चं॰ उ॰ कं॰ ४३

श्रमनिश्रिञोडुन् भृश्नि सेवायामस्मात् श्रम्न्युपपदे डुन् स्यात् डित्वाट्टिलोपः श्मन् शब्दो मुखवाची मुखमाश्रयते इति श्मश्रु नोलोप इति नलोपः तद्वृद्धौ श्मश्रु मुखमुखे इत्यमरः पुरुषमुखे तेषां रोमाणां वृद्धौ श्मश्रु शब्दो वर्त्तते इत्यर्थः जनेरः जंघच जनी प्रादुर्भावे अस्मादप्रत्ययः स्यात् धातोर्जंघादेशश्च जंघा हन्तेशरीरावयवे द्वेच हन् हिंसा गत्योरस्मादः स्यात् धातोर्द्वित्वंच पूर्वात् हन्तेरिति हस्यघः जघनं पश्चान्नितंबः स्त्रीकट्याः क्लीवितु जघनं पुर इत्यमरः क्लिशेर्लस्य लोपश्च क्लिश भूविबाधने स्मादः स्यात् धातोर्लकारस्य लोपश्च केशः केशः स्यात् पुंसि वरुणे ह्रीवेरे कुंतलेपि चेति मेदिनी फलेरितः फस्य यः फलनिष्पत्तौ अस्मादित प्रत्ययः स्यात् धातोरादेवर्णस्य पलं पलितं पलितं जरसा शौक्ल्यं मित्यमरः पलितं शैलजे तापे केशपाशेच कर्दमे इति मेदिनी कृञादेर्वुं वुप्रत्ययमाह युवोरित्यकादेशश्च डुकृञ् करणे करकः कमं

श्रमनिश्रिञोडुः। श्मन् शब्दो मुखवाची। मुखं श्रयते श्मश्रुः। जनेरो जंघच। जंघा। हन्तेशरीरावयवे द्वेच। जघनम्। क्लिशोर्ललोपश्च। केशः फलेरितः फस्य यः। पलितम्। कृञादेर्वुः। करकः। करकः। कुर गतौ। कोरकः। नरकः। चीकयतेराद्यन्तविपर्य्ययः। चीकृ शब्दे कीचकः। पचिमच्योरिरतः। पेचकः। मेचकः मच शब्दे ॥

डुबुः करकोदृष्टिपाषाणः करटेर्वर्षावरणयोः करटको वलयः नृनयेनरकः स्यान्नारकस्तु नरको निरयो दुर्गतिस्त्रियामित्यमरः नरकः पुंसि निरये देवारातिप्रभेदयो रिति मेदिनी चीकयतेराद्यंतविपर्ययः चीक आमंत्रणे चुरादिरस्माद्यंतविपर्ययोः वुश्च कीचकः णेरिति णिलोपः कीचकोऽध्वनिमद्वंशे। दैत्यभेदे द्रुमांतरे इति हे मः पचिमच्योरिरतः एतयोरुपधाया अतः ई स्यात् वुप्रत्ययश्च गुणः डुपचष् पाके पेचकः उलूके करिणः पुच्छ मूलोपांते च पेचक इत्यमरः पेचको गजलांगूलमूलोपांते च कौशिके इति मेदिनी मचि कल्कने मेचकः मेचकस्तु मयूरस्य चंद्रके श्यामले पुमान् तद्युक्ते वाच्यवत् क्लीबं स्रोतोंजनांधकारयोरिति मेदिनी ॥ रामः ४३

कुर शब्दे कोरकः कलिका कोरकः पुमान् इत्यमरः कोरकोऽस्त्री कुड्मले स्यात् कंकोलकमृणालयोरिति मेदिनी २

जनेररष्ठ च जननं जनने जनी प्रादुर्भावे च आभ्यामरप्रत्ययः स्यात् धातोर्नस्य ठश्च जठरः जठरः कठिनेपि स्यादित्यमरः हर्यतेः कन्यः हिरूच हर्य गतिकान्त्योरस्मात्
कन्यप्रत्ययः स्यात् धातोर्हिरादेशश्च कित्वान्नगुणः हिरण्यम् सुवर्णम् कृञः पासः डुकृञ् करणे ऽस्मात्पासप्रत्ययः स्यात् कर्पासः अणि प्रत्यये कार्पासं वस्त्रं ऊर्णोतेर्डः ऊर्णु
ञ् आच्छादने अस्माड्डप्रत्ययः स्यात् डित्वाट्टिलोपः ऊर्णा ऊर्णा मेषादिलोम्नि स्यादावर्ते चान्तरा भ्रुवावित्यमरः भ्रुवोर्मध्ये य आवर्तस्तत्रेत्यर्थः अंतरायोगे भ्रुवाविति द्वितीया
दधातेर्यो नुट् च डुधाञ् धारणपोषणयोरस्माद्यप्रत्ययः स्यात् प्रत्ययस्य नुडागमश्च धान्यं धान्यं व्रीहिषु धान्याके इति मेदिनी तनोतेर्डउः सवच्च तनु विस्तारे अस्मात् डउ
प्रत्ययः स्यात् सडउप्रत्ययः सप्रत्ययतुल्यो भवतीति तेन ह्रित्वादि डित्वाट्टिलोपः सेदिति पूर्वस्येत्वं तितउः तितउः पुंसि क्लीवे च पृथग्गुच्चारणोद्धयोः सामर्थ्याद्गुणो न चालनी ति
तउः पुमानित्यमरः अर्भकादयः निपात्यन्ते अर्भको बालः अर्भकः कथितो बाले मूर्खेपि कृशेपि च इति मेदिनी ऋभुवृद्धेः अस्मात् कुप्रत्ययो धातोर्धकारस्य भश्च निपात्य

जनेररष्ठ च जठरम् हर्यतेः कन्यो हिरूच हिरण्यम् कृञः पासः कर्प्पासः ऊर्णोतेर्डः ऊर्णा दधातेर्यो नुट् च धान्यम् तनोतेर्डउः सव
च्च तितउः अर्भकादयः ऋधु अर्भकः प्रथ पृथुकः पिबतेः पाकः वदेर्न्नञि अवद्यम् अव अवमः अधमः क्लिशेः कीनाशः चतेरुरश्च

ते ऋभुकः पृथुकः पुंसि चिपिटे शिशौ स्यादभिधेयवदिति मेदिनी पिबतेः पाकः पा पाने ऽस्मात्कप्रत्ययो निपातनात् पाकः परिणतौ ऽत्वारः हन्तेरोघुरूच घोरं ॥
शिशौ केशस्य जरसा ... पचनेपि चेति मेदिनी वदेर्नञि वद व्यक्तायां वाचि नञ्युपपदादस्माद्यप्रत्ययो निपात्यते अवद्यं पापं कूपूयकुत्सितावद्यखेटग
र्ह्याणकाः समा इत्यमरः अवरक्षणादौ अस्मादमप्रत्ययो निपात्यते धातोर्वकारस्य बाधकारश्च अधमः अवमः निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमा इत्यमरः क्लिशू विबाध
नेऽस्मादप्रत्ययो निपात्यते उपधाया ईत्वं लस्य लोपो नामागमश्च कीनाशः कीनाशः कर्षके क्षुद्रोपांशुघातिषु वाच्यवत् तु यमेनेति विश्वः चतेरुरूच चते याचने ऽस्मादुरप्रत्ययः स्या
त् चतुरानशौचेत्याम् चत्वारः हन्तेरोघुरूच हन हिंसागत्योरस्मादप्रत्ययः स्यात् धातोर्घरादेशश्च गुणः घोरं घोरं भीमे हरे इति विश्वः ॥ ६ ॥

सि॰ च॰ क्षमेरल्लोपश्च क्षमूष् सहने ऽस्मादप्रत्ययः स्यात् धातोरुपधायाल्लोपश्च क्ष्मावनिर्मेदिनी मही त्यमरः तरतेर्डिः तॄ प्लवनसंतरणयोरस्मात् डि प्रत्ययः स्यात् डित्वा
कौ॰ उ॰ ट्टिलोपः एडोजसीत्येवं त्रयः ग्रहेरनिः ग्रह उपादाने ऽस्मादनिप्रत्ययः स्यात् ऋतिकारादीपिती पूर्च ग्रहणिः ग्रहणी ग्रहणीरुकूत्र
४४ वातिके त्यमरः प्रथेरमः प्रथप्रख्याने ऽस्मादमप्रत्ययः स्यात् प्रथमः प्रथमस्तु भवेदादौ प्रधानेपि च वाच्यवदित्यमरः प्रथमचरमेति वैकल्पिकं सर्वादिकार्य्यम
स्मश्चरेश्च चरगतिभक्षणयोरस्मादमप्रत्ययः स्यात् चरमः मंगेरलः मगिगतावस्मादलप्रत्ययः स्यात् मंगलं मंगलं सितदूर्वायामुमायां पुंसि भूमिजे नपुंसकं तु कल्या
णेऽस्त्वार्थरक्षणेपि चेति मेदिनी ॥ॐ॥ इत्युणादौ पंचमः पादः ॥ ॐ ॥ तुमुन् तदर्थायां भविष्यति क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोर्भावे तुमुन् प्रत्ययः स्या

क्षमेरल्लोपश्च क्ष्मा तरतेर्डिः त्रयः त्रीन् ग्रहेरनिः ग्रहणिः प्रथेरमः प्रथमः चरेश्च चरमः मंगेरलः मंगलं सदोणादयः सर्वस्मिन्कालेउ
णादयः उणादयोऽपरिमिताः प्रयोगमनुसृत्य प्रयोक्तव्याः ॥ॐ॥ इत्युणादौ पंचमः पादः ॥ ॐ ॥ तुमुन् तदर्थायाम्भविष्यति धातोर्भवि
ष्यति काले तुमुन् प्रत्ययस्तदर्थायां क्रियायां गम्यमानायाम् गुडं भोक्तुं व्रजति व्याकरणं पठितुम् ॥ छे तुमर्थे वुण् कृष्णं दर्शको व्रजति ॥

त् तच्छब्देन क्रियाया अर्थः प्रयोजनं यस्याः सा क्रियार्था तस्यां त्वा द्यं तं चेत्यव्ययसंज्ञा भुज पालनादौ भोक्तुं व्रजति देवदत्तः भविष्यद्रूपं यद्भोजनं तत् प्रयोजनं
कं देवदत्तकर्तृकं व्रजनमित्यर्थः पठ व्यक्तायां वाचि कृतदृतीट् पठितुमिष्टे देवदत्तः भविष्यद्रूपं यत्पठनं तत्प्रयोजनकम् देवदत्तकर्तृकं कामे नेत्यर्थः तुमर्थे वुण् रा॰ न॰
क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धात्वर्थः कर्त्तरि वुण् प्रत्ययः स्यात् युवोरित्यकादेशः दृशिर् प्रेक्षणे कृष्णं दर्शको याति कृष्णकर्मकं भविष्यद्दर्शनकं ४४
र्तृकं दर्शनप्रयोजनकं च यानमित्यर्थः कालसमयवेलासु कालादिषूपपदेषु तुमुन् स्यात् पर्यायोपादानमर्थोपलक्षणार्थं इङ् अध्ययने अध्येतुं कालः क्षुन्नु लुनौ

नादौ भोक्तुं वेला एवमन्ये इत्यादियोगेपि अनुवादे ऽर्थे तुमुन्न भवति सिद्धस्वरूपोच्चारणमनुवादः भूतानि कालः पचतीति वार्तीद्वति ॥ ॐ ॥ इच्छार्थेष्वेककर्तृकेषूपपा
देषु धातोस्तुमुन् अक्रियार्थोपपदार्थोपि तत्र भोक्तुमिच्छति वांछति वष्टि कामयते इत्यादीच्छार्थकाः कामनिरिच्छाद्रत्युक्तत्वात् भोक्तुमिच्छतीत्यत्र भोजनविषयिणीच्छा
प्रतीयते न तु भोजनार्थेच्छेति एककर्तृकेष्विति किं पुत्रस्य पठनमिच्छति पुत्रस्येति कर्तरि षष्ठी पुत्रकर्तृकं पठनमिच्छतीत्यर्थः शकधृषज्ञाग्लाघटरभलभक्रमसहा
र्हाऽस्त्यर्थेषु एषूपपदेषु धातोस्तुमुन् स्यात् अक्रियार्थोपपदार्थमेतदपि शक्लृ शक्तौ ञिधृषा प्रागल्भ्ये ज्ञा अवबोधने ग्लै हर्षक्षये घट चेष्टायां रभ राभस्ये डुलभष् प्राप्तौ
क्रमु पादविक्षेपे षह मर्षणे अर्ह पूजायां अस भुवि अर्थग्रहणमस्तिनैव संबध्यते ऽनंतरत्वात् भोक्तुं शक्नोति धृष्णोति जानाति इत्यत्र भुजेराद्यावस्था गम्यते अर्हति
इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन् भोक्तुमिच्छति वष्टि वांछति वा कालसमयवेलासु अर्थेतुं कालः स्तोतुं समयः दातुं वेला शकधृषज्ञाग्लाघटरभ
लभक्रमसहार्हास्त्यर्थेषु शक्नोति भोक्तुम् धृष्णोति पूर्णतावाचिषु सामर्थ्यार्थेषु पर्याप्तो भोक्तुम् प्रवीणः कुशलः समर्थः पूर्णेतेति किम् पर्या
प्तं भुंक्ते घञ्भावे पाकः त्यागः भावः दायः ॥ भोक्तुमित्यत्रापि योग्यता अस्ति भवति विद्यते वा भोक्तुमित्यादौ संभव पूर्णतावाचिषु सामर्थ्यार्थेषु पर्याप्ति
वाचिषु सामर्थ्यवचनेषु उपपदेषु धातोस्तुमुन् स्यात् पर्याप्तो भोक्तुं समर्थः कुशलस्तु पटुः प्रवीण इत्यर्थः पूर्णतावाचिष्विति किं पर्याप्तं भुंक्ते प्रभूतं तेह गम्यते न तु भो
क्तुं सामर्थ्यम् घञ्भावे सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ् स्यात् क्रियांतराकांक्षोत्थापकतावच्छेदकाकांतत्वं सिद्धत्वं पिबतीत्यादौ तु साध्यावस्थापन्ने धात्वर्थे भा
व इति भविद्धत्यधिकृत्य यवक्ष्यमाणा घञादयः क्रियार्थायां क्रियायामुपपदे भवंतीत्यर्थः ञित्वाद्वृद्धिः घित्वाच्चजोः कगौ घितीति कः पच्यते पचनं वा पाकः त्यज वयोहा
नौ त्यज्यते त्यजनं वा त्यागः भूसत्तायां भूयते भवनं भावः डुदाञ् दाने दीयते दानं आतो युगिति युक् दायः ॥ ६ ॥

सि॰ चं॰ कौ॰ उ॰ ४५

संज्ञायामकर्तरिच कर्तृभिन्नेकारके ऽर्थेधातोर्घञ् स्यात् संज्ञायामसंज्ञायांच वाच्यमानायां हृञ् हरणे प्रत्याह्रियते यत्रेति प्रत्याहारः डुदाञ् दाने दीयते अस्मायि
ति आतो युगिति युकदायः डुकृञ् करणे विक्रियते ऽनेनेति विकारः इङ् अध्ययने उपेत्याऽधीयते ऽस्मादित्युपाध्यायः स्वरादः इत्यस्यापवादोयं घञ् स्वरादः स्वरां
ताद्धातोरप्रत्ययः स्यात् भावादौ घञोपवादः चिञ् चयने चयः णीञ् प्रापणे नयः षिञ् बंधने विपूर्वः विषयः लुञ् स्तुतौ स्तवः स्तवः स्तोत्रं स्तुतिर्नुतिरित्यमरः लूञ् छेदने
लवः लवलेशकणाणव इत्यमरः कृ विक्षेपे करः गॄ निगरणे गरः मदांमदादिभ्योऽप्रत्ययः स्यात् भावादौ मदी हर्षे मदः प्रमदः संमदः पण व्यवहारे स्तुतौ च पणः श

संज्ञायामकर्तरिच कर्तृवर्ज्जिते कारके भावे घञ् संज्ञायामसंज्ञायाञ्च प्रत्याहारः प्रतिकार्य्यमाह्रियते दीयते ऽस्मै दायः संज्ञा
याम् विक्रियते ऽनेन विकारः उपाध्यायः घञर्थे कः विघ्नः सुघ्नः स्वरादः भावादौ घञोऽपवादः चयः नयः विषयः लवः स्तवः स्त्वाद्युपसर्ग
हीनस्य छादेर्ह्रस्वः परिच्छदः इत्यादि किम् अन्ववप्रच्छादः समवपरिच्छादः मदाम् मदादीनामप्रत्ययो भावादौ मदः पणः प्रमदः संम =
दः शमः आश्रमः मूर्त्तौ घनः काठिन्ये परिच्छेदे च हन्तेरप्रत्ययो घनादेशः दधिघनः सैन्धवघनः हनो वधोऽप्रत्ययश्च वधः द्वितोऽथुः द्वितो धा
तोरथुर्भवति भावादौ टुवेपृ कम्पने वेपथुः वमथुः नन्दथुः श्वयथुः ड्वितस्त्रिमक् तन्निर्वृत्ते ड्वितो धातोस्त्रिमक् प्रत्ययो धात्वर्थेन निर्वृत्ते ऽर्थे करणेनति

टुवम उद्गिरणे वमः श्रमु तपसि खेदे च श्रमः मूर्त्तौ घनः मूर्त्तिः काठिन्यं तस्मिन्नभिधेये हन्तेरः स्यात् धातोर्घनादेशश्च कठिनं दधि इति दधिघनः परिच्छेदे सैंधवघनः
हनो वधोऽप्रत्ययश्च अनुपसर्गाद्धन्तेर्भावे अप्रत्ययः स्यात् धातोर्वधादेशश्च वधः चकारात् घ ञपि हनो घ इति घदादेशः घातः द्वितोथुः अयमपि स्वभावाद्भावे एव राम:
टुवेपृ कंपने वेपथुः टुणदि समृद्धौ नंदथुः टुओश्वि गतिवृद्ध्योः श्वयथुः ड्वितस्त्रिमक् तन्निर्वृत्ते धात्वर्थनिर्वृत्ते ऽर्थे ऽयं भावे एक स्वभावाद्भावे कित्वात्संप्रसारणादि ४५
डुकृञ् करणे करणेन निर्वृत्तः ॥

कृत्रिमः डुपचष् पाके न निर्वृत्तः पक्त्रिमः डुवपू बीजतंतुसंताने वापेन निर्वृत्तं यजामिति संप्रसारणं उप्त्रिमं नङ् कीड कारक कारावितौ एतौ भावे ऽ कर्त्तरि कारके च भ
वतः नङ् प्रत्ययमाह क्ङिति चेति गुणो न प्रजरेवपूजादेश्चुत्वं युत्तः यज्ञः स्तवो ऽध्वरो यागट्टत्यमरः टुयाचृ याच्ञायां याच्ञा यती प्रयत्ने यत्नं क्ङितिमूसे कौ जमे वेत्यनेन प्र
च्छविश्वपूरस्त्राणां न संप्रसारणम् प्रच्छज्ञीप्सायां प्रश्नमिति संप्रसारणं न भाव्ये ऽ नुक्तत्वात् प्रश्नं विश प्रवेशने विश्नः रक्ष पालने रक्ष्णः त्विषपूश्यये स्वप्नः कि
प्रत्ययमाह डुधाञ् धारणादौ आतो न पीत्यालोपः अंतर्द्धिः प्रधिः पयांसि धीयंते ऽ स्मिन्निति पयोधिः वारिधिः डुदाञ् दाने आदिः युट् भावे च धातोर्भावे युट्।
स्याच्च करणात् युणाच्च युवोरित्यनादेशः टित्वादीप् ञित्वाद्वृद्धिः ज्ञा अवबोधने ज्ञानम् डुकृञ् करणे युण् प्रत्ययः करणम् साधनाधारयोर्युट् साधने ऽधिकर

कृत्रिमः पाक्त्रिमः नङ्धी धातोर्न्नङ्घी प्रत्यये स्तो भावादौ यज्ञः याच्ञा यत्नैः प्रच्छविश्वपूरस्त्राणां न संप्रसारणम् प्रश्नः रक्ष पालने रक्ष्णः
स्वप्नः अन्तर्द्धिः प्रधिः आधिः व्याधिः वारिधिः पाथोधिः युट् भावे ज्ञानम् करणम् साधनाधारयोश्च पच्यते ऽनेनेति पचनो ऽग्निः पच्य
ते ऽस्यां पचनी स्थाली ईषद्दुः सुषु खल् ईषदादिषु प्रयुज्यमानेषु खल् एतौ स्तो भावादौ ईषद्भवः दुर्भवः सुकरः दुर्य्योधनः दुश्शासनः
कर्त्तृकर्मणोश्च्व्यर्थयोरीषदादिषु चोपपदेषु भूकृञोः खल् अदुराढ्येन दुराढ्येन भूयते दुराढ्यंभवम्॥ णेचार्थे धातोर्युट् प्रत्ययः स्यात् डुप
चष् पाके पच्यते ऽनेनेति पचनः अत्र करणे युट् इति तद्गती पू पच्यते ऽस्यामित्यधिकरणे युट् पचनी ईषद्दुःसुषु खल् एषूपपदेषु धातोः खल् प्रत्ययौ स्तः भा
वे कर्मणि च खल् प्रत्यये ऽहखित्वात् खिति पदस्येति नुम् भूसत्तायां ईषद्भवः दुर्भवः डुकृञ् करणे सुकरः युप्रत्ययमाह युध संप्रहारे दुःखेन युध्यते इति दु
र्योधनः दुःखेन शिष्यते इति शासु अनुशिष्टौ दुःशासनः दुरिति कृच्छ्रार्थे वर्त्तते इत्तरो ऽल्प ऽकृच्छ्रार्थे वर्त्तते कर्त्तृकर्मणोश्च्व्यर्थयोरीषदादिषु चोपपदेषु भूकृञोः ख
ल् कर्तृकर्मवाचकौ शब्दौ धातोरव्यवधाने तु प्राक् प्रयुज्येते ईषदादयस्तु ताभ्यां प्राक् प्रयोज्याः दुःखेनाढ्येन ऽनाढ्येन भूयते इति दुराढ्यंभवं ॥ ॥

दा॰

सि॰ कौ॰ भरतमुं अकारादावितिनिषेधात्कर्तरि तृतीया सुखेनानाढ्यैः आढ्यंक्रियते स्वाढ्यंकरः सः कृत्यसंज्ञकान् प्रत्ययानाह तव्यानीयौ धातोरेतौ प्रत्ययौ स्तः भावकर्मणोः त
कृ॰ उ॰ व्यप्रत्ययमनीयप्रत्ययंचाह एधवृद्धौ कृतइतीट् एधितव्यं एधनीयं त्वया आसउपवेशने आसितव्यं आसनीयं भावे औत्सर्गिकमेकवचनं क्लीवत्वंच वसेस्तव्यः
९६ कर्तरिणिच्च वसनिवसेइत्यस्यैवग्रहणं नतु वसआच्छादने इत्यस्य लुक्विकरणत्वात् अस्मात्कर्तरि तव्यः स्यात् सच णित् णित्वाद्वृद्धिः केलिमरश्च धातोःक
र्मणि केलिमप्रत्ययः स्यात् कित्वान्न गुणः भिदिर् विदारणे भिदेलिमाः सरलाः भेत्तव्या इत्यर्थः डुपचष् पाके पचेलिमामाषाः पक्तव्या इत्यर्थः स्वराद्यः स्वरान्त
भवता अनाढ्यः स्वाढ्यः क्रियते स्वाढ्यंकरः तव्यानीयौ भावकार्य्ययोः पातव्यम् पानीयम् वसेस्तव्यः कर्तरिणिच्च वसतीतिवास्तव्यः सौकर्य्ये
केलिमः धातोः केलिमः प्रत्ययो भवति पचेलिमाः भिदेलिमम् स्वराद्यः स्वरान्ताद्धातोर्य्यः चेयम् तव्यादयोऽपि चेतव्यः चयनीयः दि
त्सम् ईद्यतः आदन्ताद्धातोर्य्ये आकारस्य चई कारः देयम् ग्लेयम् गेयम् पुशकात् पवर्गान्ताच्छकादेश्च यप्रत्ययः शप्यम् जय्यम्
शक्यम् सह्यम् ऋहसा[illegible]दृ्यण् ऋवर्णान्तात् हसान्ताद्धातोर्घ्यण् कार्य्यम् हार्य्यम् वाक्यम् पाक्यम् रोग्यम् ॥ ॥
यं धातोर्विशेषणं विशेषणेन तदन्तविधिः चिञ् चयने चेयम् जिजये जेयं तव्यादयोऽपि भवंति चेतव्यः चयनीयः डुदाञ् दाने अस्मादिच्छायामात्मनः सइति सः
इस्से इति इसादेशः द्वित्वलोपश्च सस्तो नपीति सस्य तः दित्स तिसां तात्य प्रत्यये यतइत्यलोपः दित्सते इति दित्स्यः ई चातः डुदाञ् दाने देयं गैशब्दे गेयं ग्लै हर्षक्षये रामः
ग्लेयं पुशकात् अत्र घ्यण् न भवति तव्यादयस्तु सुरेव शपउपालंभे शप्यम् यमुउपरमे यम्यं जपव्यक्तायांवाचि जप्यं शकादेस्तु शक्लृ शक्तौ शक्यं षह मर्षणे ५६
सह्यं ऋहसो[illegible]र्ण्यण् ऋइति धातोर्नग्रहणं किंतु ऋवर्णस्य हसा साहचर्यात् घित्वाच्च जोकगाविति कगौणि ॥ ९ ॥ ॥

त्वाद्वृद्धिः टुकत्वं करणेकार्य्येहत्वं हरणेहार्य्यं वहप्रापणेवार्य्यं हहनहिंसागत्योः हनोघदितिघत् घात्यम् डुपचष्पाकेपाक्यम् रुजरोगेरोग्यम् वचपरिभाषणेवाक्य
म् ॥॥ कचित्कुत्वाभावः यजयाच्प्रवचरुच् एषांकुत्वंनघ्यणियजदेवपूजादौयाज्यं टुयाचृयाच्ञायांयाच्यं वचपरिभाषणेप्रपूर्वः प्रवाच्यंग्रंथविशेषः रुच्
दीप्तौरोच्यं ऋचस्तुतौ अर्च्यम् ऋदुपधात् किपितितुनभवति ओरावश्यके अवश्यमेवेत्यावश्यकंतस्मिन् उदोतोर्यः स्वरवत् यंयकारप्रत्ययंनिमित्तत्वेना
श्रित्यगुणेनयत्र ओकारोभवति वृद्ध्याच यत्र औकारोभवतिसचप्रत्ययः स्वरवद्भवतीत्यर्थः लुंपेदवश्यमः कृत्येतुम् काममनसोरपिसमोवाहिततनयोर्मांस
घ्यणि कचित्कुत्वाभावः पाच्यम् वाच्यम् रोग्यम् अर्च्यम् ओरावश्यके उवर्णान्तादावश्यकेऽर्थेघ्यण् ओदौतोर्यस्स्वरवत् ओका
रौकारयोर्निमित्तंयः प्रत्ययस्स्वरवत् लुम्पेदवश्यमः कृत्येतुंकाममनसोरपि समोवाहिततनयोर्मांसस्यपचियुड्घञोः अवश्यल्ला
व्योऽवश्यलाव्यः भोक्तुकामः श्रोतुमनाः संहितंसंततम् सततम् मांसस्यपचनम् मांसपचनम् मांसपचनम् मांसस्यपाकः मांसपा
कः मांसपाकः हनोवधादेशोयेवध्यम् ऋदुपधात्क्यप् ऋकारोपधाद्धातोः क्यप् कृती कृत्यम् वृत्यम् ॥ स्पपचियुड्घञोः १ अवश्यंनिपा
तस्यपुमान्त्यंलुंपेत् लोपंकुर्य्यात् कृत्येकृत्यसंज्ञकेप्रत्ययेपरे यथा अवश्यलाव्यः तुम्प्रत्ययस्यान्त्यंलुंपेत् काममनसोः शब्दयोः परयोः यथाभोक्तुकामः श्रो
तुमनाः समुपसर्गस्यान्त्यंवालुंपेत् हिततनयोः शब्दयोः परयोः यथासहितंसंहितंसततंसंततं मांसशब्दस्यान्त्यंलुंपेत् पचिप्रकृतियुट् घञ्प्रत्यययोः परयोः य
थामांसपचनंमांसपाकः हनोर्वधादेशोयेहन् हिंसागत्योरस्मात् यप्रत्ययः स्यात् धातोर्वधादेशश्चवध्यः पक्षेघ्यणपिहनोघदितिघत् घात्यः ऋदुपधात्
क्यप्स्यात्वाद्गुणेनपित्वात् ह्रस्वस्यपितीतितुक् कृतीछेदनेकृत्यंवृतुवर्त्तनेवृधुवृद्धौवृध्यम् तपरकरणंकिंकृतसंशब्देनेयुट्कीर्त्यम् ६ ॥

सि· कौ· कृपिचृत्योर्न· आभ्यां क्यप् न स्यात् ण्यत् कृपू सामर्थ्ये कल्प्यं चृत् ती हिंसायां चर्त्यम् मृजो वा ऋदुपधादिति नित्यं प्राप्ते विकल्पार्थमारंभः मृजूष् शुद्धौ मृज्यः क्यव भावे घ्यण्
कृ· उ· णू लघूपधस्येति वृद्धिः चजोरिति गः मार्ग्यः भुवो भावे भू सत्तायां ब्रह्मभूयं नाम्न्युपपदे इति किं भव्यं स्वराद् यदिति यः इण्स्तुशंसुवृदृजुषः शासु जुषू खनः क्यप् एभ्यो धा
४० तुभ्यः क्यप् स्यात् इण् गतौ इत्यः ष्टुञ् स्तुतौ स्तुत्यः वृङ् इति ङकारवरणे इत्यस्य ग्रहणं वृङ् संभक्तावस्मात् ण्यण् एव वार्य्यः दृङ् आदरे दृत्यः भृञ् भरणे भृत्यः कर्मकरः
भर्तव्य इत्यर्थः क्रियाशब्दोयं न तु संज्ञाशास्त्र अनुशिष्टो शासेरिती त्वम् घसादेरिति षः शिष्यः जुषी प्रीतिसेवनयोः जुष्यः खनइ त्वं क्वापि खन खनने इत्यस्य न स्यदिति त्वं स्या
भृत्य कृपिचृत्योर्न कल्प्यम् चृतदीप्तौ चर्त्यम् मृजो वा मृज्यम् मार्ग्यं भुवो भावे नाम्न्युपपदे भुवो भावे क्यप् ब्रह्मणो भावः ब्रह्मभूयम्
नाम्नि किम् भव्यम् इण्स्तु मदृवृशासुजुषखनः क्यप् च इत्यः स्तुत्यः दृङ् आदरे दृत्यः वृत्यः शासेरि शिष्यः जुषी प्रीतिसेवनयोः
जुष्यः खनईत् क्वापि खेयम् भिद्योध्यौ नदे भिनत्ति कूलमिति भिद्यः उज्झति जलमित्युध्यः कृवृषोर्वा क्यप् कृत्यम् कार्य्यम् वृष्य
म् वर्ष्य पुष्यसिध्यौ नक्षत्रे सिध्यम् पुष्यन्ति कार्य्याण्यस्मिन्निति पुष्यः राजसूयादयः ॥ त् क्वापि खेयं भिद्योध्यौ नदे भिदिर् विदारणे उज्झ इत्या
आभ्यां क्यप् स्यात् कर्तरि उज्झेर्धत्वं च निपात्यते नदे वाच्ये भिनत्ति कूलमिति भिद्यः उज्झत्युदकमिति उद्ध्यः नदे किं भेत्ता उज्झिता तत्प्रत्ययः कृवृषोर्वा क्यप् क
र्तरि डुकृञ् करणे वृषु सेचने आभ्यां वा क्यप् स्यात् करोतेः क्यप् अप्राप्ते वृषस्तु ऋदुपधादिति नित्यं प्राप्ते विकल्पः ह्रस्वस्य पिती तितुक् कृत्यम् वृष्यम् क्यवा = रामः
भावपक्षे घ्यण् कार्य्यम् वर्ष्यम् पुष्यसिद्ध्यौ नक्षत्रे पुष पुष्टौ षिधु गत्यामाभ्यामधिकरणेर्थे क्यप् निपात्यते पुष्यः सिद्ध्यः नक्षत्रे किम् पोषणं सेवनं साधनाधारयो ४७
रिति पुष्य राजसूयादयः क्यवंताः शब्दाः निपात्यंते षुञ् अभिषवे राज्ञा सोतव्यः इति राजसूयः अभिषवद्वारा निष्पादयितव्य इत्यर्थः यद्वा राजा सूयते कंडूयतेऽ

राजसूयः राजेति सोमः अधिकरणे क्यप् निपातनाद्दीर्घः अर्द्धर्चादित्वात् पुन्नपुंसकः सृ गतौ सरत्याकाशे इति सूर्य्यः कर्त्तरि क्यप् निपातनादुत्वादेशः र्वोर्विहेति दीर्घः
यद्वा षू प्रेरणे तुदादिः सुवति कर्मणि लोकं प्रेरयतीति सूर्य्यः क्यपो रुट् निपातनात् तव्यादयोऽर्हेऽर्थे विधौ शक्तौ च वाच्याः दृशिर् प्रेक्षणेऽस्मात्तव्यप्रत्यये गुणे कृते रा
रोऽकसेदृशामिति रः छशषेति षत्वं ष्टुत्वं द्रष्टव्यः अनीयप्रत्यये तु दर्शनीयः क्यपि तु दृश्यः इङ् अध्ययनेऽस्मात्तव्यप्रत्यये गुणे कृते अध्येतव्यः अनीये तु अ
ध्ययनीयः यप्रत्यये अध्येयः श्रु श्रवणे श्रोतव्यः श्रवणीयः क्यपि तु श्रुत्यः मन ज्ञाने मंतव्यः मननीयः वह प्रापणेऽस्मात्तव्यप्रत्यये होढ इति ढत्वे तथोर्द्ध इ
ति धत्वे ष्टुत्वं ढि ढो लोप इति ढलोपः पूर्वदीर्घौ सहिवहोरित्योत्वं वोढव्यः वहनीयः कृत्यक्तखलार्थाः प्रत्ययाः भावकर्मणोर्भवंति इति कृत्यप्रत्ययाः स्त्रियां यजं

राजसूयः सूर्य्यः तव्यादयोऽर्हेऽर्थे विधौ शक्तौ च वक्तव्याः दर्शनार्हो द्रष्टव्यः दर्शनीयः दृश्यः स्वाध्यायोऽध्येतव्यः अध्ययनीयः अध्येयः
श्रोतव्यः मंतव्यः निदिध्यासितव्यः वोढव्यः तव्यादीनां कृत्यसञ्ज्ञा स्त्रियां यजाभावे यजादेर्धातोः स्त्रियां भावे क्यप् इज्या
व्रज्या समज्या निषद्या निपत्या मन्या सुत्या शय्या भृत्या इत्या कृत्या ॥

भावे क्यप् प्रत्ययः कपोपयोगमाह पित्वान्न कित्वाद्गुणनिषेधः संप्रसार
णं च यज देवपूजादौ यजामिति संप्रसारणं यजनमिज्या व्रज गतौ व्रजनं व्रज्या संज्ञायां समजनिषदनिपतमनाम् अज गतौ क्षेपणे च समजंत्यस्यामिति समज्या
सभा अजेः क्यपि वी भावो न निपातनात् षद्लृ विशरणादौ निषीदंत्यस्यामिति निषद्या आपणः प्रादेश्चेति षत्वं पतॢ पतने निपतंत्यस्यामिति निपत्या पिच्छिला
भूमिः मन ज्ञाने मन्यतेऽनया मन्या गलपार्श्वनाडी विद ज्ञाने विदंत्यनयेति विद्या षुञ् अभिषवे ह्रस्वस्येति तुक् सुत्या अभिषवः शीङ् स्वप्ने शेरतेऽस्यामिति शीङो य
ङ् यक्ङितीत्ययङ् शय्या डुभृञ् धारणादौ भृत्या जीविका इण् गतौ ईयतेऽनयेति इत्या शिबिका डुकृञ् करणे कृत्या कृञो यक् वा करोतेर्यक् प्रत्ययो वा स्यात्
[illegible] भावे शप्रत्ययो निपातनात् भवति भावकर्मणोरर्थयोः यक्प्रत्यये यकीति रिङादेशः आ वत इत्या प्रक्रिया शप्रत्यये तु यक् चतुर्थे इति यक् ॥ ॥

सि॰ चं॰ अत्यर्ह्दतेरिङ् आपृच्छ्यक्रिया इच्छा यामस्मात् शप्रत्ययो निपात्यते शित्वाच्चतुर्वत्कार्यं तेन गमामिनिवुः आवतङित्याप् इच्छा स्वगतो अस्मात् शप्रत्ययक्
कृ॰ प्रत्ययो निपात्यते धातोर्गुणश्च शप्रत्यये यक् चतुर्थितियक् यतइत्यलोपः आपृपरिसर्पणं परिसर्यायकि तु निपातनान्नाद्गुणः परिसर्या अटगतो अस्माद्पिशय
५८ कोनिपात्यते शप्रत्यये तु यक् दुर्थितियक् यतइत्यलोपः निपातनात् टयशब्दस्यद्वित्वं पूर्वभागे यकारनिवृत्तिर्दीर्घोवपि निपातनात् आवतङित्याप् अटाट्या
यकितुट्यशब्दद्वित्वयकारं निवृत्तिर्दीर्घो पूर्ववदेव अटाट्या अन्येतु अटगतावस्मात् सूचिसूत्रिमूत्र्यटीतियङ् स्वरादेरिति टयशब्दस्यद्वित्वं आतइतिपूर्व
स्यात्वं अटाट्येत्यस्मात् प्रत्ययान्तादित्ययान्तादित्यङ् प्रत्ययः अनपिचेतियलोपः यतइत्यलोपः आपृच अटाट्या आसउपवेशने निपातनाद्यक् अस्याजागरनि
अयकि क्रिया इषेरिच्छेतिनिपातः सर्तेर्गुणः परिसर्या अटाट्या आ[illegible]स्या जागर्तेर्गुणः जागर्या हनस्तः हत्याक्तिः धातोः क्तिः स्त्रि
याम्भावे कृतिः वुद्धिः स्मृतिः ञमान्तस्यदीर्घः शान्तिः दान्तिः कान्तिः क्षान्तिः ह्वेञ् हूतिः ऋद्धिः स्फातिः हवत्योर्नेट् संशीतिः ग्रहादीना
ह्रासनेअस्मात् शयेर्णकारप्रत्ययानिपातनाद्धवंतिशप्रत्यये शित्वाच्चतुर्वत्कार्यं तेन यक् चतुर्थितियक् जागर्तेर्विङ् णूणपुङि तुभिन्नेति ऐमिट् निगृहीतिः॥
गुणः आपृच जागर्यायकि तु जागर्तेरितिगुणः जागर्या अकारप्रत्यये गुणः जागराहनस्तः अनुपसर्गेनाम्न्युपपदे हंतेर्भावे क्यप् स्यात् धातोर्नस्यतश्च ब्रह्मणोहनं
नं व्रतहत्याक्तिः धातोः स्त्रीलिंगे भावादौ क्तिप्रत्ययः स्यात् घञोऽपवादः डुकृञ् करणे कृतिः वुधअवगमने तथोर्धइतितस्यधः झषेजवाइतिपूर्वधस्यदः वुद्धिः राम॰
स्मृचिंतायां स्मृतिः शमुदमुउपशमे क्मुकांतौ क्षमूषसहने ञमस्यक्ङितीतिदीर्घः शांतिः दांतिः कांतिः क्षांतिः हवत्योर्नेट् हवप्रत्याहार क्तिप्रत्यययोरिङ् नस्यात् शीङ् ५८
स्वप्ने संशीतिः ग्रहादीनामिट् ग्रहादीनां क्तिप्रत्ययस्येट् ग्रहउपादाने ग्रहामितिसंप्रसारणं ईटोग्रहामितिदीर्घः निगृहीतिः पठवक्तायांवाचिनिपठतिः ॥ ॥

६

ग्लादेर्निः ग्लादेर्धातोर्निः प्रत्ययः स्यात् ग्लै म्लै हर्षक्षये ग्लानिः म्लानिः ज्रि त्वरा संभ्रमे ज्वर त्वर त्यूः तूर्णिः ॠल्वादिभ्यः क्तेर्निः ॠद् दंतात् ल्वादिभ्यश्च परस्य क्तेः
र्निः स्यात् कॄ विक्षेपे ॠत इद्धातोरितीर् ष्वोर्विहसेद् इति दीर्घः कीर्णिः गॄ निगरणे गीर्णिः लूञ् छेदने लूनिः धूञ् कंपने धूनिः संपदादिभ्यः क्विप् वा पक्षे क्तिः पद गतौ
संपत् विपत् संपत्तिः विपत्तिः कर्त्तरि क्तिः संज्ञायां धातोः कर्त्तरि क्तिः स्यात् संज्ञायां वाच्यायां प्रकुरुते इति प्रकृतिः षिद्भिदामङ् षितो धातोर्भिदादिभ्यश्च स्त्रियाम्
अङ् स्यात् डुपचष् पाके आवतन्द्रत्यापूपचा मृजूष्मुद्धौ मृजा भिदिर् विदारणे अर्थे भिदा अन्या भिद्यते इति भित्तिः कुडुं कर्थतर्हि मुषाङ्गं गंधलस्वैरिति प्रेक्षोपल
ब्धिश्चित् संविदित्यमरश्च षित्वादिहाङ् प्रत्यय उचितः सत्यं अनेर्थकास्तु प्रतिवर्णमनुपलब्धेरिति भाष्यप्रयोगाद्वा हुलकात् क्तिः प्रत्ययोपि बोध्यः ॠतो ङि गु

ग्लादेर्निः ग्लानिः म्लानिः त्वरतेर्वस्योत्वम् तूर्णिः ॠल्वादिभ्यः क्तेर्निः कीर्णिः गीर्णिः लूनिः धूनिः संपदादेः क्विब्वा सम्पत् सम्पत्तिः क
र्तरि क्तिः सञ्ज्ञायाम् प्रकुरुते इति प्रकृतिः षिद्भिदामङ् षितो धातोर्भिदादेश्च स्त्रियामङ् पचा ॠतोऽङि गुणः जरा भिदा छिदा मृजा
क्षिपा गुहा गुरोर्हसात् गुरुमतो हसान्तात् स्त्रियामङ् न क्तिः ईहा ऊहा कुण्डा प्रत्ययात् स्त्रियामङ् चिकीर्षा ॥ ६ ॥

णः ॠतो धातोर्गुणः स्यात् अङि परे जॄष् वयोहानौ जरा छिदिर् द्वैधीकरणे छिदा द्वैधीकरणे एवायं अन्यत्र तु छिद्यते इति छित्तिः क्षिप् क्षेपे संप्रसारणं च
कृपायामस्य संप्रसारणं स्यात् अङि परे कृपा क्षिप प्रेरणे क्षिपा रात्रिः गुहू संवरणे गुहा गुरोर्हसात् ईह चेष्टायाम् ईहा ऊह वितर्के ऊहा कुडि दाहे कुंडा गुरुमत इति
किं भक्तिः हसान्तादिति किं नीतिः प्रत्ययांतात् प्रत्ययांताद्धातोरङ् प्रत्ययः स्यात् स्त्रियां डुकृञ् करणे स्मात् इच्छायामात्मन इति सप्रत्यये कृते वुः सेटीड् न नानिटि से
इति [illegible] णः सेदीर्घ इति दीर्घे कृते ॠत इद्धातोरितीर् ष्वोर्विहसेद् इति दीर्घः द्वित्वादि पूर्ववत् स धातुरिति धातुत्वादङ् कर्तुमिच्छतीति चिकीर्षति चिकीर्षा लूञ् छेदने ऽस्मा
दतिशयेहसादेरिति यङ् द्वित्वं च यङीति पूर्वस्य गुणः लोलूयते इत्यस्मात् अङ् प्रत्ययस्मात् अङ् प्रत्यये यत इत्यस्य लोपः अतिशयेन लुनातीति लोलूयते २ इति ॥

भतं

लोलुपः कंडूञ् गात्रविघर्षणे अस्मात् कंड्वादिभ्यइति यक् यगंताद् ङिःपरे यतइत्यल्लोपः कंडूयतइति कंडूया पुत्रशब्दात् काम्यश्चेति काम्यप्रत्ययस्ततोऽ इत्यन
इत्यलोपः पुत्रमिच्छतीति पुत्रकाम्यति पुत्रकाम्यतीति पुत्रकाम्या धात्वर्थनिर्देशे ण्वुल् वक्तव्यः आशिकाशायिकाकाप्यत इति त्वंइ कृप्लिपो धातुनिर्देशे इकृप्लिपोग्रा
त्ययावाह कित्वाद्गुणोनस्यात्पाचं तु वेनूतेनावादि प्रत्ययोभवति डुपचष् पाके चिअपूकर्तरीत्य पूपचतिः वहुलमित्यनुवृत्तेः कचिन्नेनौ भुवो गुणिति ण्यंतासश्रंथ
घट्टिवंदिविदिइषिभ्यः स्त्रियां युः एभ्यो युः स्यात् आडोपवादः युप्रत्ययमाह युवोरित्यनादेशः डुकृञ् करणे णेरिनिटिणिलोपः कारणा हृञ् हरणे हारयतीति हार
णा अर्थयाञ्चायां अर्थयतीति अर्थना त्रीण्यपि एवं नोदाहरणानि आसउपवेशने आस्यतेऽस्यामिति आसनाष्वण् प्रत्ययेतु आस्यांश्रथसंदर्भे श्रंथनाघटचे।

लोलुपा। कण्डूया। पुत्रकाम्या। इकृप्लियौधातुनिर्देशे। पचिः। पचतिः। ण्यन्तासश्रंथघट्टिवन्दिविदिइषिभ्यः स्त्रियां युः। कारणा। आ
सना। श्रंथना। घटना। वन्दना। वेदना। एषणा। इञ् जादिभ्यः। आजिः। आतिः। आक्रोशेनञ्यनिः। अकरणिः। अजननिः। इकृकृष्यादि

भ्यः। कृषिः। गिरिः॥

ष्टायांघटनावदि अभिवादनस्तुत्योः वंदना अत्रविल्लाभे। अयमेवगृह्यतेवेदना ज्ञानार्थस्यविदेस्तुसंवित्तिः अनिच्छार्थस्येषेरत्र
ग्रहणं इषगतौ अन्वेषणाद् इञ् जादिभ्यः अजप्रभृतिभ्योधातुभ्यइञ् स्यात् इञ् प्रत्ययमाह ञित्वाद्वृद्धिः अजगत्यादौ वाहुलकात् अजेर्वीभावोन आजिः संग्रा
मः अटगतौ आटिः अतसातत्यगमने आतिः परिप्रश्ने आख्यानेचगम्येधातोरिञ् वास्यात् वुण्च यथाप्राप्तमन्येपिप्रत्ययाभवंति कांत्वं कारिं कारिकां कृत्यांकृ
तिंवाऽकार्षीः एवं गणिं गणिकां गणनां पाचिकां पचां पक्तिम् आख्यानेप्येवं इकृकृष्यादिभ्यः इकृप्रत्ययमाह कित्वान्नगुणः कृषविलेखने कृषिः गॄनिगरणे ऋतइद्
गिरिः कृविक्षेपे किरिः आवश्यकाधमर्ण्ययोर्णिनिः अवश्यंकारी शतंदायी भविष्यदर्थेणिनिः श्वग्रामंगामी॥ ६ ॥

क्रियां

रामः ५९

पूर्वकाले क्त्वा समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात् पूर्वकालेत्र बहुव्रीहिः क्त्वा तु अव्ययकृतो भाव इति भावे भावोपि घञादाविव नेह सिद्धा
वस्थापन्नः किंतु साध्यावस्थापन्नः स च धातुनैव लब्धः क्त्वा प्रकृत्यर्थभूतक्रियाचक्रियांतरं प्रति विशेषणं भवति क्त्वा प्रत्ययमाह कित्वान्न गुणः क्त्वाद्यंत्यमित्य
व्ययत्वाद्विभक्तेर्लुक् क्त्वा सेट् किन्न धातोः परः सेट् क्त्वा किन्न स्यात् वृतु वर्तने क्त इति इट् वर्तित्वा शीङ् स्वप्ने शयित्वा सेट् किं क्त्वा किन्न इति सम्मृड मृद गुध कुष क्लिश
वद वस रुद विद मुष ग्रहिभ्यः कित् एभ्यो धातुभ्यः सेट् क्त्वा कित् मृड सुखने मृद क्षोदे गुध परिवेष्टने गुध रोषे च कुष निः कर्षे क्लिश् हिंसायां दिवादि क्लिश्
विबाधने क्र्यादिः वद व्यक्तायां वाचि वस निवासे रुदिर् अश्रुविमोचने विद ज्ञाने मुष स्तेये ग्रह उपादाने मृड मृडित्वा मृद मृदित्वा गुध गुधित्वा कुष कुषित्वा क्लि

पूर्वकाले क्त्वा धातोस्समानकर्तृके प्रयुज्यमाने क्त्वा प्रत्ययः सेट् क्त्वा किन्न वर्तित्वा शयित्वा मृड मृद गुध कुष क्लिश वद वस रु
द विद मुष ग्रहिभ्यः कित् मृडित्वा मृदित्वा उषित्वा विदित्वा मुषित्वा गृहीत्वा नोपधात्थफान्ताद्वा कित् ग्रंथित्वा ग्रथित्वा गुंफित्वा
गुफित्वा अलंखल्वोः प्रतिषेधे अलं भुक्त्वा खलु कृत्वा ॥ मृडु दित्वा द्वेट् क्लिशित्वा क्लिष्ट्वा वद यजामिति संप्रसारणं उदित्वा वस वसि स्रुध्यो
रितीट् यजामिति संप्रसारणं घसादेरिति षः उषित्वा रुदिर् रुदित्वा विद् विदित्वा मुष मुषित्वा ग्रह ग्रहामिति संप्रसारणं ईटो ग्रहामिति दीर्घः गृहीत्वा नोपधात्
थफांताद्वा नोपधाद्धातोः थफान्तात्परः सेट् क्त्वा वा कित् स्यात् ग्रंथ संदर्भे कित्वान्नो लोप इति नलोपः ग्रथित्वा ग्रंथित्वा गुंफ गुंफने कित्वात्पक्षे नलोपः
गुफित्वा गुंफित्वा नोपधात् किं कोथित्वा रेफित्वा कुथ पूतीभावे रिफ कत्थन युद्धनिंदाहिंसादानेषु इह इद्वर्णोपधादिति विकल्पोपि न भवति नोपध ग्रहणसामर्थ्यात् अलंख
ल्वोः अतेषेधे प्रतिषेधे धात्वर्थे अलंखल्वो रुपपदयोर्धातोः क्त्वा स्यात् भुज पालनादौ अलं भुक्त्वा डुकृञ् करणे कित इतीट् खलु कृत्वा अलं खल्वोः किं मा कार्षीत्

सि॰ चं॰ उदितः क्त्वो वेट् उदितो धातोः परस्य क्त्वाप्रत्ययस्येड् वा स्यात् इट्पक्षे इत्वा यां कुदित्वाद्दिदूदूट् पक्षे क्त्वा सेडित्यकित्वाद्गुणः एषित्वा इडभावे इष्ट्वा इट् ष्ठू भ्रमु च

कृ॰ शमेर्नेदुदित्वादिट् भ्रमित्वा इडभावे अनुनासिकस्येति दीर्घः भ्रान्त्वा अदो जग्धिः अद भक्षणे अस्य जग्धादेशः क्त्वाप्रत्यये तथोर्धोऽध इति धः खरि च पाद इति घस्य कः कृवे

त्वादिति कस्य गः जग्ध्वा समासेऽनञ्पूर्वे क्त्वो ल्यप् अव्ययपूर्वपदे अनञ्समासे समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात् क्त्वा ल्यप् प्रत्ययमाह

कित्वाद्गुणो न पित्वात् ह्रस्वस्य पिति कृति तुक् डुभृञ् धारणपोषणयोः णम् प्रह्वत्वे शब्दे च प्रणम्य शब्दो नाम्नश्च कृते तेन क्त्वां तेन नित्यसमासे ते सम्भृत्य प्रणम्य अनञ्कि

म् अकृत्वाऽव्ययपूर्वपदे इति किम् परमकृत्वा मांतानि दोधातून् नान्त्र मस्य लोपो वा भवति क्त्वा पि वनमितनोत्यादीनां तु लोपस्त्वनुदात्तनना मिति नित्यं अमस्य लो

उदितः क्त्वो वेट् एषित्वा इष्ट्वा भ्रमित्वा भ्रान्त्वा अदो जग्धिः जग्ध्वा समासे क्त्वा ल्यप् समासे सति पूर्वकाले क्त्वा ल्यप् समानकर्तृके

धातोरश्रूयमाणे सम्भृत्य करोति प्रणम्य गच्छति प्रणत्य गच्छति अनञ्पूर्वे इत्येके अकृत्वा क्त्वा पि लघुपूर्वात्परस्य णेरय् परिण

मय्य लघुपूर्वात्किम् सम्प्रधार्य्य आप्नोतेर्वा प्राप्य प्राप्य ॥ पः आगत्य आगम्य प्रणत्य प्रणम्य अन्यत्र तु नित्यम् प्रहत्य प्रमत्य वितत्य क्त्वा पि ल

घुपूर्वात्परस्य णेरय् लघुः पूर्वो यस्माद्वर्णात् लघुपूर्वं वर्णात्परस्य णेरयादेशः स्यादित्यर्थः णम् प्रह्वत्वे शब्दे च अस्मात्प्रयोजकणिप्रत्यये जनीजृष्क्नसुरञ्जोऽमन्ताश्च इति मित्त्वात् ।

मितम् मितां ह्रस्व इति ह्रस्वत्वे णेरयादेशः प्रणमय्य गणसंख्याने चुरादिरदन्तः अस्मात्स्वार्थे णिप्रत्यये अत इत्यलोपः न त्विह कृतस्याऽल्लोपस्य स्थानिव रामः

द्भावेन लघुपूर्वकवर्णात्परत्वं नास्तीति कथमयादेशः स्यात् उच्यते अत्रायादेशे कर्त्तव्येऽल्लोपस्य स्थानिवत्त्वं भाष्यादौ न स्वीकृतम् अस्ति विगणय्य लघुपूर्वादिति कि ५०

म् सम्प्रधार्य्य संपूर्वात् धृ धारणे स्मात् प्रयोजकणिप्रत्ययान्तात् क्त्वा पि कृते णेरिति णिलोपः आप्नोतेर्वा आप्लृ व्याप्तौ अस्मात्परस्य णेरयादेशो वा स्यात् अप्राप्तवि

श्रीहर्षः अयमयोगिवधूवधपातकी भ्रमिमवाप्य दिवः खलु पात्यते इत्यत्रावाप्येत्यस्यावापय्येत्यर्थो बोध्यः॥ ॐ॥ कपोत्वाभावः दादेरितीत्वमुस्थामीत्वं च प्राप्तमनेन
निषिध्यते डुदाञ् दाने प्रदाय षष्ठा गतिनिवृत्तौ प्रस्थाय षोन्तकर्मणि प्रसाय डुधाञ् धारणादौ विधाय कथं तर्हि निपीय यस्येति श्रीहर्षप्रयोग इति चेदत्राहुः दिवादिग
णस्य स्यपीङ् पाने इत्यस्य रूपमिति तत्काले पिकचित् कापि स्यात् डुदाञ् दाने व्यादाय यदेव स्वपिति तदेव मुखं व्यादत्ते मीलनिमीलने निमील्य यदेव हसति तदेव ने
त्रे संमीलयतीत्यर्थः पौनः पुन्येणमुल् पदं द्विश्च पौनः पुन्ये द्योत्ये समानकर्तृकयोः पूर्वकाले धातोर्णमुल् स्यात् चकारात् क्त्वा च णमंतस्य द्वित्वं चणमुल् प्रत्ययमाह णि
त्वाद्वृद्धिः त्वायंतं चेत्यव्ययत्वाद्विभक्तेर्लुक् पापाने ऽस्मात् णमि कृते आतो युगिति युक् पायंपायं पक्षे पीत्वा स्थामीतीत्वं भुजपालनादौ भोजंभुक्त्वा २ स्मृचिंतायां
कपोत्वाभावः प्रदाय प्रधाय प्रस्थाय प्रसाय मिनोतिमीनातीत्यात्वम् प्रमाय निमाय एवं लि लीङोरात्वम्चेत्यादि विलीय विलायत
त्काले ऽपि क्वचित् नेत्रे संमील्य हसति मुखं व्यादाय स्वपिति पौनपुन्येणमुल् पदं द्विश्च समानकर्तृकेषु धातुषु पूर्वकाले धातोर्णमुल् णमन्त
स्य पदस्य द्विर्वचनम् पायंपायं गच्छति भोजंभोजम् स्मारंस्मारम् मितांन्यन्तानामिणिणमि च वा दीर्घः गामंगामम् गमंगमम् ला
भम् लाभम् लंभम् लंभम् कथमादिषु स्वार्थे कृञो णमुल् कथंकारम् अन्यथाकारं एवंकारम् इत्थंकारम् पठति एवंकारं पठतीत्यर्थः
... पक्षे स्मृत्वा २ गम्लृ गतौ न्यंतादस्मात् णमि कृते जीन्दृषित्यमंते चानुमित् डुलभष् प्राप्तौ संज्ञायां मितां ह्रस्व इति ह्रस्वे कृते मितां न्यंतानामिणिणमि चेति वा दी
र्घः लामं लामम् २ पक्षे गत्वा २ डुलभष् प्राप्तौ अस्मात् णमि कृते लभेरिसामोरिति वा नुम् लंभम् २ नुमभावे वृद्धिः लाभम् २ पक्षे लब्ध्वा २ कथंआदिषु स्वार्थे पुकृञो
णमुल् कथान्त्यमन्यथैवमित्यादिषूपपदेषु कृञो णमुल् स्यात् यदि कृञ् प्रयोगानर्हः स्यात् कथंकारं पठति कथं पठतीत्यर्थः अन्यथाकारं भुंक्ते अन्यथा भुंक्ते इत्यर्थः
एवंकारं करोति एवं करोतीत्यर्थः इत्थंकारं वदति इत्थं वदतीत्यर्थः प्रयोगानर्ह इति किम् शिरो ऽन्यथा कृत्वा भुंक्ते ॥ ६ ॥ ॥ ॥

सि॰ च॰ अग्रे प्रथमपूर्वेषूपपदेषु क्त्वाणमौ वा पौनः पुन्य इति नानुवर्त्तते एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमौ वा स्तः अग्रे इति सप्तम्यं तस्यानुकरणं प्रकृतिवदनु

क॰ उ॰ करणात् अव्ययस्य वैकल्पिकत्वाद्विभक्तेर्लुक् न कृतः अग्रे भोजं ऽग्रे भुक्त्वा वा व्रजति अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वा व्रजतीत्यर्थः पक्षे लडादयः अग्रे भुंक्ते पौनः पुन्ये तु

भ॰ ॥ विहितमेव तणमुक्त्वा च अग्रे भोजं २ भुक्त्वा २ वा व्रजति कर्मण्याक्रोशे कृञः खमुञ् कर्मण्युपपदे आक्रोशे गम्ये करोतेः खमुञ् स्यात् खमुञ् प्रत्ययमाह खित्वात्खि

ल्पदस्येति मुम् ञित्वाद्वृद्धिः उकार उच्चारणार्थः करोतिरुच्चारणेऽर्थे वर्त्तते चौरंकारमाक्रोशति चौरशब्दमुच्चार्येत्यर्थः स्वाद्वर्थेषु कृञो णमुल् स्वादुपर्यायेषूपप

अग्रे प्रथमपूर्वेषूपपदेषु क्त्वाणमौ वा अग्रे भोजं व्रजति अग्रे भुक्त्वा प्रथमम्भोजम् प्रथमम्भुक्त्वा पूर्वम्भुक्त्वा पूर्वम्भोजम् पक्षे प्र

त्ययान्तरञ्च अग्रे भुंक्ते ततो व्रजति आभीक्ष्ण्ये तु पूर्वेणानित्यमेवणम् अग्रे भोजं भोजम्व्रजति कर्मण्याक्रोशे कृञः खमुञ् चौरं

कारमाक्रोशति चौरशब्दमुच्चार्येत्यर्थः स्वाद्वर्थेषु स्वाद्वर्थे कृञो णमुल् स्यादेककर्तृकयोः पूर्वकाले पूर्वपदस्य मान्तत्वं निपात्यते अस्वा

दुं स्वादुं कृत्वा भुंक्ते स्वादुंकारं भुंक्ते सम्पन्नंकारम् लवणंकारम् सम्पन्नलवणशब्दौ स्वादुपर्यायौ क्त्वापि स्वादुं कृत्वा भुंक्ते यथा

तथयोरसूयाप्रतिवचने कृञः सिद्धाऽप्रयोगे णमुल् यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन सिद्धाप्रयोगे किं सिद्धं कृत्वा भुंक्ते ॥

देषु एककर्तृकयोः पूर्वकाले करोतेर्णमुल् स्यात् पूर्वपदस्य मान्तत्वं निपात्यते यथातथयोरसूयाप्रतिवचने यथातथयोरुपपदयोः करोतेः सिद्धाऽप्रयोगे णमुल् स्यात् राम॰

सिद्धः अप्रयोगोऽस्य एवंभूतश्चेत् कृञ् व्यर्थत्वात् प्रयोगानर्ह इत्यर्थः गुणेषु दोषारोपणमसूया असूयया प्रतिवचनं असूयाप्रतिवचनं तस्मिन् वाच्ये सति य ५१

थाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये यथा भोक्ष्ये इत तथा भोक्ष्ये इत्यर्थः ॥

कर्मणि दृशिविदोः साकल्ये कर्मण्युपपदे दृशिविदोर्णमुल् स्यात् साकल्ये सकलस्य भावः साकल्यं तस्मिन् दृशिर् प्रेक्षणे विद ज्ञाने विद्लृ लाभे विद विचारणे इ
तित्रयाणां ग्रहणम् यावति विंदजीवोः यावच्छब्दे उपपदे विद्लृ लाभे जीव प्राणधारणे आभ्यां णमुल् स्यात् कर्मणोश्चर्मोदरयोः पूरेः चर्मोदरयोः कर्मणोरु
पपदयोः पूरी आप्यायने ऽस्मात् णमुल् स्यात् चर्मपूरं स्तृणाति आच्छादयतीत्यर्थः कर्मण्युपपदे पूरेरूलोपश्च वा वर्षप्रमाणे गम्ये णमुल् स्यात् समुदायेन वा

कर्मणि दृशिविदोः साकल्ये कन्यादर्शं वरयति सर्वाः कन्या इत्यर्थः ब्राह्मणवेदं भोजयति यं यं ब्राह्मणं जानाति लभते विचारयति
वा तं तं सर्वं भोजयतीत्यर्थः यावति विन्दजीवोः यावद्वेदं भुंक्ते यावल्लभते तावदित्यर्थः यावज्जीवमधीते विप्रः कर्मणोश्चर्मोदर
योः पूरेः चर्मपूरं स्तृणाति उदरपूरं भुंक्ते कर्मण्युपपदे पूरेरूलोपश्च वा वर्षप्रमाणे गम्ये णमुल् गोष्पदप्रं वृष्टो देवः गोष्पदपूरं वा
मूषिकाबिलप्रं वृष्टो देवः मूषिकाबिलपूरं वा चेलार्थे कर्मण्युपपदे क्नोपेर्वर्षप्रमाणे णमुल् चेलक्नोपं वृष्टो देवः वस्त्रक्नोपम् वसन
क्नोपम् निमूलसमूलयोः कषः कषादिषु यथाविध्यनुप्रयोगः प्रयोक्तव्यः अत्र प्रकरणे पूर्वकाल इति न संबध्यते निमूलका
षं कषति समूलकाषं कषति निमूलं समूलं वा कषतीत्यर्थः ॥ र्षप्रमाणे गम्ये वर्षं वृष्टिरित्यमरः वर्षस्य वृष्टेः प्रमाणं वर्षप्रमाणं तस्मिन् चेला
र्थे कर्मण्युपपदे क्नोपेर्वर्षप्रमाणे चेलमर्थो येषां तानि चेलार्थानि तेषु कर्मण्युपपदेषु क्नूयी शब्दे उंदे च अस्माण्ण्यंतात् णमुल् स्यात् क्नूयधातोः प्रयोजक णिच्प्रत्यये क्न
ते अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुगिति पुक् यवयोर्वले हकारे चेति यलोपः पुगंतेति गुणः क्नोपि इति जाते णमुल् णेरिति णिलोपः चेलं क्नोपयति आर्द्रीकरोतीति चेलक्नोपं नि
मूलसमूलयोः कषः निमूलसमूलयोः कर्मणोरुपपदयोः कष हिंसायामस्मात् धातोर्णमुल् स्यात् ॥

सि॰ कौ॰ शुष्कचूर्णरूक्षेषु कर्मसूपपदेषु पिषः एषु कर्मसूपपदेषु पिषः संचूर्णने ऽस्माद्धातोर्णमुल् स्यात् समूलाकृतजीवेषु हन्कृञ्ग्रहां णमुल् समूलादिषु कर्मसूपपदेषु हना
कृ॰ उ॰ दिभ्यो णमुल् स्यात् हनादीनामेव यथाविध्यनुप्रयोगश्च कर्तव्यः समूलोपपदाद्धन्तेर्णमि कृते हनो घदिति घत् ततो तउपधाया वृद्धिः समूलघातं जीवोपप
पू॰ दाद्ग्रहेर्णमि कृते वृद्धिः जीवग्राहं जीवतीति जीवः नाम्युपधाक्रितिकः जीवं तं गृह्णातीत्यर्थः करणे हनः करणकारकोपपदाद्धन्तेर्णमुल् स्यात् हन्तेरनुप्र
योगश्च नित्यसमासार्थमिदं सूत्रं भिन्नधातुसंबंधे तु हिंसार्थानामिति वक्ष्यते स्नेहने पिषः स्नेहनकरणोपपदात् पिषः संचूर्णने ऽस्मात् णमुल् स्यात् स्निह्यते येन।
शुष्कचूर्णरूक्षेषु कर्मसूपपदेषु पिषः शुष्कपेषं पिनष्टि शुष्कं पिनष्टीत्यर्थः चूर्णपेषम् रूक्षपेषम् समूलाकृतजीवेषु कर्मसु हनकृ
ञ्ग्रहां णमुल् समूलघातं हन्ति समूलं हन्तीत्यर्थः अकृतकारं करोति जीवग्राहं गृह्णाति जीवं गृह्णातीत्यर्थः करणे हनः पादघातं ह
न्ति पादेन हन्तीत्यर्थः स्नेहने पिषः उदकपेषं पिनष्टि उदकेन पिनष्टीत्यर्थः हस्तार्थे करणे वर्तिग्रहोः हस्तवर्तं वर्तयति करवर्तम् ह
स्तेन गुटिकां करोतीत्यर्थः हस्तग्राहं गृह्णाति करग्राहम् पाणिग्राहम् धनार्थे करणे पुषः धनपोषं पुष्णाति स्वपोषम् गोपोषम् आ
धारे बन्धः चक्रबन्धं बध्नाति चक्रे बध्नातीत्यर्थः ॥ तत्र स्नेहनं तस्मिन् पेषं वा सवाहनधिषु परेषु उदकस्योदादेशो वक्तव्यः इत्युदादेशः उदपेषं
हस्तार्थे करणे वर्तिग्रहोः हस्तार्थकरणकारकोपपदाभ्यां वर्तिग्रहिभ्यां णमुल् स्यात् अनयोर्यथाविध्यनुप्रयोगश्च वृतु वर्तने ण्यंतादस्मात् णमि कृते णेरिति। रामः
णिलोपः हस्तवर्तं हस्तग्राहम् गृह्णाति हस्तेन गृह्णातीत्यर्थः धनार्थे करणे पुषः धनपर्यायविशेषे चोपपदे पुष पुष्टौ अस्मात् णमुल् स्यात् अनुप्रयोगश्च ५२
आधारे बंधः अधिकरणोपपदाद्बंध बंधने ऽस्मात् णमुल् स्यात् अनुप्रयोगश्च ॥

संज्ञायांबध्नातेः संज्ञायांवाच्यायामस्माण्णमुल्स्यात् कर्त्रोर्जीवपुरुषयोर्नशिवहोः जीवपुरुषकर्तृकोपपदाभ्यां नशअदर्शने वहप्रापणे आभ्यां णमुल्स्यात् यथावि-
ध्यनुप्रयोगश्च ऊर्ध्वे कर्तरि शुषिपूरोः ऊर्ध्वकर्त्रोपपदाभ्यां शुषशोषणे पूरी आप्यायने आभ्यां णमुल्स्यात् यथाऽनयोरनुप्रयोगश्च ऊर्ध्वशोषं शुष्यति वृक्षादिरू-
र्ध्व एव तिष्ठन् शुष्यतीत्यर्थः ऊर्ध्वपूरं पूर्यते ऊर्ध्वमुख एव घटादिर्वर्षोदकादिना पूर्णो भवतीत्यर्थः उपमाने कर्मणि कर्तरि च उपमानवाचके कर्तरि कर्मणि चो

संज्ञायांबध्नातेः क्रौञ्चबन्धं बद्धः मयूरिकाबन्धं बद्धः अट्टालिकाबन्धम् बन्धविशेषाणां संज्ञा एताः कर्त्रोर्जीवपुरुषयोर्नशिवहोः
जीवनाशं नश्यति जीवो नश्यतीत्यर्थः पुरुषवाहं वहति पुरुषो वहतीत्यर्थः ऊर्ध्वे कर्तरि शुषिपूरोः ऊर्ध्वशोषं शुष्यति ऊर्ध्वः शुष्यतीत्य-
र्थः ऊर्ध्वपूरं पूर्यते ऊर्ध्वः पूर्यत इत्यर्थः उपमाने कर्मणि कर्तरि च घृतनिधायं निहितं जलम् घृतमिव सुरक्षितमित्यर्थः अजनाशं अजइव न-
ष्ट इत्यर्थः कषादिषु यस्माण्णमुल् विहितस्तस्य एवानुप्रयोक्तव्यः तथैवोदाहृतम् उपदंशस्तृतीयायाम् इतः प्रभृति पूर्वकाल इति संबध्य-
ते मूलकोपदंशं भुंक्ते मूलकेनोपदंशम् दश्यमानस्य मूलकस्य भुजिं प्रति करणत्वात्तृतीया यद्यप्युपदंशिना सह न शाब्दः संबंधः
तथा[illegible]र्थोऽस्त्येव हिंसार्थानां चानुप्रयोगधातुना समानकर्मकाणां तृतीयान्ते उपपदे दण्डोपघातं गाः कालयति दण्डेनोपघातम्
दण्डताडं दण्डेन ताडयित्वा समानकर्मकाणां किम् दण्डेन चौरमाहत्य गाः कालयति ॥ पपदे धातोर्णमुल्स्यात् तस्यैव धातोरनुप्रयोगश्च उ-
पदंशस्तृतीयायां तृतीयान्तोपपदादुपदंशतेर्णमुल्स्यात् मूलकोपदंशं वाक्यमपि च मूलकेनोपदंशं हिंसार्थानामनुप्रयोगधातुना समानकर्मणां तृतीयान्ते उपपदे तृती-
यान्तोपपदादनुप्रयोगधातुना सह समानकर्मकाद्धिंसार्थात् णमुल्स्यात् हंतेर्णमि कृते हनो घ दिति घत्वं वृद्धिः दंडोपघातं गाः कालयति कल विक्षेपे चुरादिः प्रेरयती

सि॰ चं॰ सप्तम्यां तृतीयायां चोपपदे उपपीडरुधकर्षः सप्तमीतृतीयांतोपपदेभ्य उपपूर्वेभ्यः पीडादिभ्यो णमुल्स्यात् इह सूत्रे पीडादीनां समाहारद्वंद्वं कृत्वा उपपूर्वैः पीडारुध

कृ॰ उ॰ कर्ष इत्युत्तरपदलोपी समासः कर्तव्यः सूत्रे पुंस्त्वं सौत्रं ज्ञेयं पंचम्यर्थे प्रथमा च ज्ञेया पीड पीडायां रुधिर् आवरणे कृष विलेखने अयं भौवादिक एव गृह्यते गुण

पृ॰ ३ संकेतस्य कृषेरपानिर्देशात् तत्फलं तु दादेरुदासः यद्यपि विलेखने एव तौदादिकोपि पठ्यते तथापि क्षेत्रविषयक विलेखने एव तौदादिकः प्रयुज्यते एवं च तौ

दादिकात् कर्षः क्यप्प्रत्यय एव भवति क्षेत्रे उपकृष्य हलेनोपकृष्येति तृतीयासप्तम्योरुपपदयोः सन्निकर्षे धातोः तृतीयासप्तम्युपपदाद्धातोर्णमुल्स्यात् सन्नि

सप्तम्यां तृतीयायां चोपपदे उपपीडरुधकर्षः पार्श्वोपपीडं शेते पार्श्वाभ्यामुपपीडम् पार्श्वयोरुपपीडम्वा व्रजोपरोधं गाः स्थापय

ति व्रजेनोपरोधम् पाण्युपकर्षं धानाः संगृह्णाति पाणावुपकर्षम् पाणिनोपकर्षम् तृतीयासप्तम्योरुपपदयोः संनिकर्षे धातोः

केशग्राहं युध्यन्ते केशेषु गृहीत्वा युध्यंत इत्यर्थः हस्तग्राहम् हस्तेन गृहीत्वा तृतीयासप्तम्योः प्रमाणे गम्ये धातोः द्व्यंगुलोत्कर्षं

खण्डिकां छिनत्ति द्व्यंगुलेन द्व्यंगुले वोत्कर्षम् अपादाने द्वितीयायां च त्वरायां गम्यमानायां धातोः शय्योत्थायं धावति यष्टिग्राहं =॥

कर्षः संबंधः तृतीयासप्तम्योः प्रमाणे गम्ये धातोः तृतीयासप्तम्युपपदाद्धातोर्णमुल्स्यात् प्रमाणे गम्ये द्वयोरंगु ॥ युध्यन्ते लोष्ठग्राहम् अपगुरो णमुलि

ल्योः समाहारो द्व्यंगुलं द्व्यंगुलोत्कर्षम् द्व्यंगुलेनोपकृष्य परिच्छिद्य इत्यर्थः खंडिकां छिनत्ति ह्रस्वः खण्डः खंडिका तां अपादाने द्वितीयायां च त्वरायां गम्यायां राम॰

धातोः पंचमी द्वितीयांतोपपदाद्धातोर्णमुल् त्वरायां गम्यमानायां शय्योत्थायं धावति शय्याया उत्थाय धावतीत्यर्थः आतो युगिति युक् उदः स्थास्तंभोरिति सलोपं यष्टि पृ॰ ३

ग्राहं युध्यंते एवं खलु युद्धाय त्वरंते यष्ट्यादिकमपि हीत्वा धावंति नायुधं प्रतीक्षंते इत्यर्थः अपगुरो वीणम्यो तः ॥ ६ ॥

गुरीउद्यमे इत्यस्यौकारस्यात्वं वास्यात् णमि प्रत्यये अस्यपगारं युध्यंते असिमुद्यम्येत्यर्थः अध्रुवे स्वांगे द्वितीयांते धातोः द्वितीयांताद् ध्रुव स्वांगोपपदाद्धातो।
र्णमुल् स्यात् परिक्लिश्यमाने द्वितीयांते स्वांगे धातोः सर्वतो बाध्यमाने स्वांगे द्वितीयांते उपपदे सति धातोर्णमुल् स्यात् पिष्लृ संचूर्णने उरः प्रतिपेषं द्वितीयांते विशिपति
पदिस्कंदां व्याप्यमानासेव्यमानयोर्गम्ययोः द्वितीयांतोपपदेभ्यो विश्यादिभ्यो णमुल् स्यात् व्याप्तावर्थे पौनःपुन्ये चार्थे गम्ये वीप्सायां पदं द्विरिति क्रियासमभिहारे

गुरीउद्यमे अस्यपगारं युध्यन्ते अस्यपगोरम् अध्रुवे स्वाङ्गे द्वितीयान्ते धातोः भ्रुविक्षेपं कथयति भ्रुवंविक्षेपम् अध्रुवे किम् शिरउ
त्क्षिप्य येन विना न जीवनं तद्ध्रुवम् परिक्लिश्यमाने द्वितीयान्ते स्वाङ्गे धातोः उरः प्रतिपेषं युध्यन्ते कृत्स्नमुरस्संपीडयित्वेत्यर्थः उरो विदा
रं प्रतिचस्करे नखैः ध्रुवार्थमिदम् द्वितीयान्ते विशिपतिपदिस्कंदां व्याप्यमानासेव्यमानयोर्गम्ययोः गेहादिद्रव्याणां विश्यादिक्रियाभिः
साकल्येन संबन्धो व्याप्तिः क्रियायाः पौनःपुन्यमासेवा गेहानुप्रवेशमास्ते [redacted]म् एवं गेहानुप्रयातम् गेहानुप्रपादम् गेहा
नुस्कन्दम् असमासे गेहस्य णमन्तस्य च पर्यायेणाद्वित्वम् गेहमनुप्रवेशमनुप्रवेशम् कालेषु द्वितीयान्तेषूपपदेषु क्रियाव्यवधाने व
र्तमानयोरस्यतितृषोः द्व्यहात्यासं गाः पाययति द्व्यहमत्यासम् द्व्यहतर्षम् द्व्यहंतर्षम् अत्यसनेन तर्षणेन च गवां पानक्रि
याव्यवधीयते अद्य पाययित्वा द्व्यहमतिक्रम्य पुनः पाययतीत्यर्थः ॥

द्वेद्वेतिद्वित्वं तु न भवति समासे नैव वीप्सासमभिहारयोरुक्तत्वात् यद्यपि पौनःपुन्ये णमुक्त एव तथापि द्वितीयांतस्योपपदसंज्ञार्थमासेवायामिति पुनर्विधिः समासे गेहानु
प्रवेशं असमासे गेहं गेहमनुप्रवेशमिति च क्रियांतरेषु कालेषु द्वितीयांतेषूपपदेषु क्रियाव्यवधाने वर्तमानयोरस्यतितृषोः क्रियामंतरयंति व्यवधाने इति क्रियांतराः तेषु क्रि
यांतरकालचिषु शब्देषु द्वितीयांतेषूपपदेषु सत्सु क्रियाऽव्यवधाने वर्तमानाभ्यामसुक्षेपणे ञितृषा पिपासायामाभ्यां णमुल् स्यात् ॥ नै ६ ॥

वा

गेहं गेहं अनुप्रवेशम्

क्रियान्तरेषु

सिद्धान्त-चन्द्रिका लीथोग्राफ

Size- 37.5x15 cm

सि॰ च॰ नाम्निद्वितीयांते आदिशिग्रहोः द्वितीयांते नामशब्दोपपदाभ्यां आङ् पूर्वकदिशअतिसर्जने ग्रह उपादाने आभ्यांसमूस्यात् अव्ययेयथाभिप्रेताख्याने कृञः

कृ॰ उ॰ ण्कारणमौ अव्ययपूर्वपदात्करोतेः ण्कारणमौस्तः अयथाभिप्रेताख्यानेर्थेयथाभिप्रेतंनतथाख्यानमित्यर्थः अप्रियस्यनीचैः कथनंयथाभिप्रेताख्यानंतद्विपरीतं

५४ अयथाभिप्रेताख्यानमितितिर्यगुपपदेसमाप्तौकृञः ण्कारणमौ तिर्यक्शब्दोपपदात्करोतेः ण्कारणमौस्तः समाप्तौगम्यमानायांसमाप्तौकिम् तिर्यक्कृत्वाका

नाम्निद्वितीयान्ते आदिशिग्रहोः नामादेशमाचष्टे नामग्राहंकथयति अव्ययेऽयथाभिप्रेताख्यानेकृञः ण्कारणमौअयथाभिप्रे

ताख्यानंनामअप्रियस्योच्चैः प्रियस्यनीचैः कथनम् उच्चैः कृत्यइतिउच्चैः कृत्वाउच्चैः कारंवाऽप्रियमाचष्टे नीचैः कृत्यइतिनीचैः कृत्वा

नीचैः कारंवाप्रियंब्रूते तिर्य्यगुपपदेसमाप्तौकृञः ण्कारणमौतिर्य्यक्कृत्यगत इतितिर्य्यक्कृत्वातिर्य्यक्कारम् समाप्यगतइत्यर्थः

समाप्तौकिम् तिर्य्यक्कृत्वाकाष्ठङ्गतः स्वाङ्गेतस्प्रत्ययेकृभ्वोः मुखतःकृत्वामुखतःकारम् मुखतोभूयगतइतिमुखतोभूत्वा मुखतो

ङ्गतः अग्रतःस्थितंपार्श्वतः कृत्वागतइत्यर्थः स्वांगेतस्प्रत्ययेकृभ्वोः तस्प्रत्ययांतेस्वांगेउपपदेडुकृञ्करणेभूसत्तायामाभ्यांणम् स्यात् तस्प्रत्ययोयस्मात्तत् तस् रामः

प्रत्ययंतस्मिन् तस्प्रत्ययेकिम् मुखेतस्यतीतिमुखतः कृत्वागतः तमुउपपदेऽस्मात् क्विपिकृतेधातुत्वादिहत्वऽत्वसोःसाविति दीर्घोनभवति ॥ ॥ ५४